Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CALCUTTA ORIENTAL SERIES.

No. 2.

CHANAKYA-RAJANITI-SASTRAM.

चाणक्य-राजनीति-शास्त्रम् ।

EDITED

BY

PANDIT ISVARA CHANDRA SASTRI
SANKHYA-VEDANTA-NYAYA-DARSANA-TIRTHA.

WITH A FOREWORD

BY

NARENDRA NATH LAW, M.A., B.L.,
PREMCHAND ROYCHAND SCHOLAR.

CALCUTTA.

Printed by Sukamoy Mitra
At the "New Arya Mission Press,"
9, Sibnarain Dass Lane,
1919.

All rights reserved.] [Price 14 as.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

COPY RIGHT
by
NARENDRA NATH LAW,
Calcutta.

CALCUTTA ORIENTAL SERIES.

No. 1. YUKTI-KALPA-TARU.

Price Rs. 2-8-0

प्राप्तिस्थानम् ।

संस्कृतयन्त्रपुस्तकालय, ३० कर्णवालिसष्ट्रीट् ।

कलिकाता ।

In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

FOREWORD

The title of this work may lead one to suppose that it deals exclusively with royal polity and was composed by the famous minister of Chandragupta Maurya. The first supposition is true to this extent that the fourth and the fifth chapters touch on a few topics of polity, while the second is perhaps wholly baseless, although stray portions may claim to have some connection with the views and thoughts embodied in the *Chanakya-Sutra*. The concluding *sloka* mentions this compilation as the "Chanakya-ruby" offered by king Bhoja, the famous patron of learning of the eleventh century, which evidently hints that it was compiled, if not by himself, at least under his auspices. The reasons for associating it with the name of the great minister may be, (1) connection, as aforesaid, with the *Chanakya-Sutra*, and (2) desire to add weight to it by an indication of the connection in the title. The treatment of topics of polity in the fourth chapter is more diluted than in the fifth which principally details the groups of qualities meant to guide the king as standards by which to judge the fitness of the public officials and members of his household staff for their respective posts. The officials mentioned are (1) military commander, (2) chamberlain, (3) scribe, (4) ambassador, (5) elephant-keeper, (6) physician, (7) preceptor, (8) priest, (9) astrologer, (10) councillor, and (11) superintendent of the harem. Incidentally, one or two verses offer advice as to inter-state policy, and utilisation of revenue. In view of this small element of polity confined mainly to the said two chapters, the use of the title *Rajaniti* may appear to be inappropriate ; but its justification is perhaps to be sought in the fact that the remaining chapters containing maxims of prudence and virtue are meant for the *guidance of the king* though they may be profitably followed by all men in their dealings with others in the conduct of worldly affairs.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

So far as I find, several couplets of this brochure (some with slight modifications) can be identified with those of other works, e. g.

Chanakya-Rajaniti Sastra II, 54 ; III, 5 ; VII, 8, 26 ; VIII, 54, 62.	Mahabharata
VII, 20. ...	Ramayana
VI 37. ...	Brihadaranyaka Upanishad
VII, 18. ...	Kautiliya
III, 6, 27 ; VI, 97 ; VII, 10 ; VIII, 49, 61.	Manu
VI, 59. ...	Bhagavadgita
III, 65 ; IV, 23. ...	Kumarasambhava
II, 26. ...	Nitisataka
VI, 35 ; VIII, 145.	Maha-Nataka
IV, 12, 37 ; VII, 25, 68, 90 ; VIII, 53.	Panchatantra
III, 15, 40 ; VII, 61, 69, 85, 86 ; VIII, 8, 19, 30, 35, 36, 43, 45, 50, 69, 73, 78.	Hitopadesa
III, 70. ...	Bhamati
V, 11 ; VII, 24, 74, 75, 78, 82 ; VIII, 12.	Laghu-Chanakya.
VI, 21. ...	Santi-Sataka.
VIII, 40, 44, 48, 49, 50, 96.	Garuda-Purana.

This identity of *slokas* does not always imply direct borrowing, one from the other, in view of the fact that earlier works or the floating mass of oral traditions may serve as common depositaries for the borrowing. The work itself acknowledges in its opening lines that it has drawn upon various *Sastras*, which supports the inference that it is a compilation. A more pointed reference has, however, been made, in a rather detached *sloka* (I,16), to the *Sutras* of Chanakya, which, I think, is none other than that recently edited by Pandit R. Shama Sastri B. A. and published in the Mysore Oriental Series. On a comparison of the *Sutras* with this *Rajaniti*, the debt appears to lie more in the identity of sense

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

of select *Sutras* and verses of the *Rajaniti* than in an out-and-out versification of the *Sutras* with their words and expressions kept intact as far as possible, e. g.

Chanakya-Sutra	*Chanakya-RajanitiSastra.*
No. 108	Chapter I Sloka 11
„ 336	„ I „ 44
„ 537	„ II „ 1&2
„ 215, 519	„ II „ 12
„ 296	„ II „ 30
„ 297	„ II „ 36
„ 479	„ II „ 42
„ 255	„ IV „ 13, 15
„ 2	„ IV „ 16, 21
„ 258	„ IV „ 17
„ 257	„ IV „ 25
„ 194, 105 & 535	„ IV „ 84
„ 48	„ IV „ 38

Apart from the question of its borrowings from valued sources, or its affiliation to any particular work of note like the *Chanakya Sutra*, this manual has an importance of its own. If wise apophthegms clothed in a finished poetic garb have a power to attract, delight, and instruct our minds, it can well claim to be put by the side of such collections as the *Laghu-Chanakya* and *Vriddha-Chanakya*.

96, Amherst Street, Calcutta.
July, 1919.

Narendra Nath Law.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एतेषु च बृद्ध (द्धि) चाणक्यं जैनानां ग्रन्थेषु विद्यते ।
श्रीमद् भोजराजसये तु बृहस्पतिभार्गवयोरेव नीतिप्रणयने प्राधान्यम् । तथाहि तद्विरचितयुक्तिकल्पतरुप्रारम्भे, "नीतिर्बृहस्पतिप्रोक्ता तथैवौशनसी परा" तेनेत्युक्तम् । परन्तु मानवधर्म्मशास्त्रे-महाभारते पराशरादिविरचितसंहितासु रामायणे पुराणेषु च बहुधा ते तैर्ग्रन्थप्रणेतृभि-स्तत्तद्ग्रन्थेषु सुप्रपञ्चिताः । स्वतन्त्ररूपेण तु वैशम्पायननीति-विदूरनीति-नीतिमयुख वीरमित्रोदयोक्त राजनीत्याधाय-धौम्यनीति-कामन्दकनीति प्रभृतयोह्युपलभ्यन्ते । अस्मिन् चाणक्य-राजनीति-शास्त्रे सामान्यनीतिविषया राजनीतिविषयाश्च वर्त्तन्ते । श्लोकेन ग्रथितत्वादत्राष्टावध्यायाः सन्ति ।

विशेषतो नृपादिलक्षण-मन्त्रि दूत-पुरोहित लेखक-गणक-गजाध्यक्षादिलक्षणादीनि सन्ति । तथान्ये च नैतिका बहवो व्यवहार-विषयाः सन्ति । ग्रन्थान्तर्गीताः श्लोकाः अन्यत्र पञ्चतन्त्र-हितोपदेश-काव्य-नाटक-नीतिग्रन्थादिषु ये विद्यन्ते तेषु केचिदत्रापि दृश्यन्ते । किमस्मात्तत्तद्ग्रन्थकृद्भिस्तत्र संगृहीतास्ते किम्वा एतद्ग्रन्थकर्त्रा तेभ्य आत्र समाहृतास्तन्निश्चेतुं न शक्नोमि । तद्धि सहृदयसुधीवृन्दै-रालोचनीयम् । केवलमत्रैकमेवादर्शपुस्तकमुपलभ्य पुस्तकमिदं यथा-दर्शमुद्रापितम् । पाठसन्निवेशस्तु आदर्शग्रन्थानुसारेण कृतो व्याकरण-दृष्टं विना नैव किमपि परिवर्त्तितम् । अतिशयग्राम्यभावमयत्वेन केचिच्छ्लोका अन्तरा परित्यक्ता नैव परिवर्त्तिताः । एतस्यावसाने "चाणक्यमाणिक्यमिदं कण्ठे बिभ्रति ये बुधाः । प्रहितं भोजराजेन भुवि किं प्राप्यते न तैः" इत्ययं श्लोकोऽस्ति । स च भोजराजसमये तदादिष्टस्य कस्यापि लेखकस्य चाणक्य प्रशंसापर एवेत्यनुमीयते मयेति ।

कलिकाता,
१९१९ खृः ।

श्रीईश्वरचन्द्र शास्त्री ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

चाणक्य-राजनीति-शास्त्रम् ।



प्रथमोऽध्यायः ।

एकदन्तं त्रिनयनं ज्वालानल समप्रभम् ।
गणाध्यक्षं गजमुखं प्रणमामि विनायकम् ॥ १ ॥
प्रणम्य शिरसा विष्णुं त्रैलोक्याधिपतिं प्रभुम् ।
नानाशास्त्रोद्धृतं वक्ष्ये राजनीति-समुच्चयम् ॥ २ ॥
येन सम्यगधीतेन प्रज्ञाविस्तरतोनृणाम् ।
सत्यशौचरतोनित्यं हिंसाक्रोध विवर्ज्जितः ॥ ३ ॥
पठित्वैवं शुभंशास्त्रमिदं ज्ञास्यति तत्त्वतः ।
धर्म्मोपदेशं व्याख्यातं कार्य्याकार्य्ये शुभाशुभे ॥ ४ ॥
तदहं सम्प्रवक्ष्यामि यज्ज्ञात्वा पुरुषोऽचिरात् ।
लभते विपुलाङ्कीर्त्तिं नचार्थेन वियुज्यते ॥ ५ ॥
रहस्यभेदं पैशुन्यं परदोषानुकीर्त्तनम् ।
कलहं परनिन्दाञ्च दूरतः परिवर्ज्जयेत् ॥ ६ ॥
श्रूयतां धर्म्मसर्व्वस्वं श्रुत्वाचैवोपधारयेत् ।
आत्मनः प्रतिकूलानि न परेषां समाचरेत् ॥ ७ ॥
वर्ज्जयेत् क्षुद्रसंवादं अरिष्टस्यच दर्शनम् ।
विवादं सह मित्रेण प्रीतिञ्च सह शत्रुभिः ॥ ८ ॥
मूर्खशिष्योपदेशेन दुष्टस्त्री-भरणेन च ।
दुःखितां सम्प्रयोगेण पण्डितोऽप्यवसीदति ॥ ९ ॥
कालेन रिपुणा सन्धिः काले मित्रेण विग्रहः ।
कालं कारणमाश्रित्य कालं क्षिपति पण्डितः ॥ १० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

काले संवर्द्धते वीजं काले गर्भं प्रमुञ्चति ।
कालोजनयते पुत्रं पुन: कालोऽपिसंहरेत् ॥ ११ ॥
कालात् प्ररोहति विश्वं पुन: काल: प्रवर्त्तते ।
स्थूलसूक्ष्मगति: कालो विविधं तत्त्वचोच्यते ॥ १२ ॥
काल: पचति भूतानि काल: संहरते प्रजा: ।
काल: सुप्तेषुजागर्त्ति कालोहि दुरतिक्रम: ॥ १३ ॥
क: काल: कानिमित्तानि कोदेश: कौव्ययाव्ययौ ।
कोवाहं काच मे शक्तिरितिचिन्त्यं मुहुर्म्मुहु: ॥ १४ ॥
अदाता पुरुषत्यागी धनं सन्त्यज्य गच्छति ।
दातारं कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति ॥ १५ ॥
मूलसूत्रं प्रवक्ष्यामि चाणक्येन यथोदितम् ।
यस्य विज्ञानमात्रेण सर्व्वज्ञत्वं प्रपद्यते ॥ १६ ॥
राजानो यज्ञभूमिश्च ब्राह्मणो नट-नर्त्तका: ।
अवश्यं तत्रगन्तव्यं महापातक-नाशनम् ॥ १७ ॥
उत्तमै: सह सङ्गश्च पण्डितै: सह सत्कथा: ।
अलुब्धै: सह मित्रत्वं कुर्व्वाणो नावसीदति ॥ १८ ॥
परवादं परस्त्रेच्छां परिहासं परस्त्रिया ।
परवेश्मनि वासञ्च नकुर्व्वीत कदाचन ॥ १९ ॥
परोऽपि हितवान् बन्धु र्ब्बन्धुरप्यहित: पर: ।
अहितोदेहजोव्याधिर्हितमारण्यमौषधम् ॥ २० ॥
नारी नश्यतिरूपेण तप:क्रोधेन नश्यति ।
स्नेहोदूर प्रवासेन शूद्रान्नेन द्विजोत्तम: ॥ २१ ॥
स बन्धुर्योहितं युङ्क्ते स पिता पुत्रपोषक: ।
तन्मित्रं यत्रसद्भाव: सदेशो यत्र निर्वृति: ॥ २२ ॥
सजीवति गुणोयस्य धर्म्मोयस्य सजीवति ।
गुणधर्म्म-विहीनो य: जीवितं तस्य निष्फलम् ॥ २३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

जीवने यस्य जीवन्ति मित्रानीष्टाः सबान्धवाः ।
सफलं जीवितं तस्य आत्मार्थेको न जीवति ॥ २४ ॥
अतिजीवति वित्तेन सुखं जीवति विद्यया ।
किञ्चिज्जीवति शिल्पेन ऋते कर्म्म न जीवति ॥ २५ ॥
पिता च ऋणवान् शत्रुः माता शत्रुरशोलिनी ।
भार्य्यारूपवती शत्रुः पुत्रः शत्रुरपण्डितः ॥ २६ ॥
साभार्य्या या प्रियंब्रुते सपुत्रो यत्र निर्वृतिः ।
सभृत्यो यस्तु चित्तज्ञ स्तद्गेजं यत् प्ररोहति ॥ २७ ॥
सा भार्य्या यागृहे दक्षा साभार्य्या या प्रियंवदा ।
साभार्य्या या पतिप्राणा साभार्य्या या प्रजावती ॥ २८ ॥
नित्यंस्नाता सुगन्धाच नित्यञ्च प्रियभाषिणी ।
अल्पाशनाल्पभाषाच देवता सा न मानुषी ॥ २९ ॥
साध्वी सुशीलसम्पन्ना सुरूपाचगुणान्विता ।
देवाग्निगुरुभक्ताच सा भार्य्या भोगमोक्षदा ॥ ३० ॥
आर्त्तार्त्ते मुदिते हृष्टा प्रोषिते मलिना कृशा ।
मृते म्रियेत यापत्यौ साज्ञेया पतिव्रता ॥ ३१ ॥
अर्द्धं भार्य्याशरीरस्य भार्य्याभोष्टमता सुखम् ।
भार्य्यामूलं त्रिवर्गस्य भार्य्याऽमैत्रेप्रणश्यति ॥ ३२ ॥
सदाहृष्टाव्ययसन्तुष्टा मिथाव्ययपराङ्मुखी ।
यस्यैतादृशी भार्य्या देवेन्द्रोऽसौनमानुषः ॥ ३३ ॥
भार्य्यावन्तः क्रियावन्तः सतत गृहमेधिनः ।
भार्य्यामूलं कुलं सर्व्वं तस्माद्भार्य्या परागतिः ॥ ३४ ॥
देवब्राह्मणभक्ताच नित्यं धर्म्मानुषङ्गिनी ।
यस्य भार्य्या सुदानित्यं देवेन्द्रोऽसौनमानुषः ॥ ३५ ॥
सतत मङ्गलैर्युक्ता सतत धर्म्मवत्सला ।
सतत ज्ञानशीलाच सतत द्विज-पूजका ॥ ३६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भर्त्तृभक्ताच सततं सर्व्वसौभाग्यवर्द्धिनी।
यस्यैतादृशी भार्य्या देवेन्द्रोऽसौ नमानुषः॥ ३७॥
यस्य भार्य्याविरूपाक्षी कश्मला कलहप्रिया।
उत्तरोत्तरदात्रीच सा जरा न जरा जरा॥ ३८॥
यस्य भार्य्या सदा दुष्टा परवेश्माभिगामिनी।
कुचेला त्यक्तलज्जा च सा जरा न जरा जरा॥ ३९॥
नास्तीतिवादिनी नित्यं क्षुत्पिपासा समन्विता।
भर्त्तृघ्नी निर्दया दीना सा जरेति स्मृता बुधैः॥ ४०॥
आयान्तं स्वपतिं दृष्ट्वा भक्षयन्ती सदाऽखिलम्।
परित्यक्ता निजैः पुत्रैर्बान्धवैः स्वजनैस्तथा॥ ४१॥
चोरी स्वामि-परोक्षीच योगिनी स्वाधिकारिणी।
वाग्भटी चाग्निदोषाच स्यादसाध्वीति षड्गुणाः॥ ४२॥
अशुचीनाञ्च सर्व्वासां आलयाः कुत्सितप्रियाः।
प्रचोरयुर्नटक्षन्ति भुञ्जतेऽन्नं तथाविधम्॥ ४३॥
यातु भार्य्या शुचिर्दक्षा मिष्टान्न प्रियवादिनी।
अप्रमत्ता भर्त्तृभक्ता सा श्रीरित्युच्यते बुधैः॥ ४४॥
दुष्टा भार्य्या शठं मित्रं भृत्यश्चोत्तरदायकः।
स सर्पेच गृहे वासो मृत्युरेव न संशयः॥ ४५॥
सततं दानधर्म्माच द्विज-शुश्रूषणे रता।
देवाग्नि गुरुभक्ताच साभार्य्या भोगमोक्षदा॥ ४६॥
एवमेवं क्रियायुक्ता सर्व्वसौभाग्यदायिनी।
यस्यैषाच भवेद्भार्य्या देवेन्द्रोऽसौनमानुषः॥ ४७॥

मिथ्यारुदन्ति विहसन्ति सदार्थहेतोः,
आश्वासयन्ति पुरुषं मतिवञ्चनाय।
तस्मान्नरेण कुलशील समन्वितेन,
वेश्याः श्मशान-घटिका इव वर्ज्जनीयाः॥ ४८॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

न दानेन न मानेन नार्ज्जवेन न सेवया ।
न शस्त्रेण न शास्त्रेण सर्वथा विषमा: स्त्रिय: ॥ ४९ ॥
जल्पन्ति साकमन्येन पश्यन्त्यन्यं सविभ्रमम् ।
हृदतं चिन्तयन्त्यन्यं प्रिय: कोनाम योषिताम् ॥ ५० ॥
अनृतं साहसं माया मूर्खत्वं वञ्चनन्तथा ।
अशौचं निर्दयत्वञ्च स्त्रीणां स्वाभाविका गुणा: ॥ ५१ ॥
कार्य्येषुमन्त्री करणेषु दासी,
स्नेहेषु माता क्षमया धरित्री ।
धर्म्मस्य पत्नी शयनेच वेश्या,
षट्कर्म्मभि: स्त्रीकुलमुद्धरेत्तु ॥ ५२ ॥
अतिप्रचण्डा बहुपाक-पाकिनी,
विवादशीला स्वयमेव तस्करी ।
आक्रोशबीजा परवेश्म-गामिनी,
त्याज्यातु भार्य्या दशपुत्रसूरपि ॥ ५३ ॥
व्याली कण्ठप्रदेशे वरमतुलविषोद्गारिणी धारणीया,
क्रोष्टव्या वाग्निखाग्रे घनरुधिरवसा भीषणा व्याघ्रकन्या ।
वल्गेरालिङ्गनीया वरमपि च शिखा काकजिह्वाकराला,
न स्त्रीसेव्या विदग्धै: परनरगमन-भ्रान्तचित्ताविरक्ता ॥ ५४ ॥
ग्रावेषु तैलं सुकृतं कृतघ्ने,
गीतं हुताशे तपनं हिमांशौ ।
उप्यते दैववशात् कदाचित्,
वेश्यानुराग: सहजस्तु न स्यात् ॥ ५५ ॥
काक: पद्मवने धृतिं न लभते हंसश्च कूपोदके,
क्रोष्टासिंह-गुहान्तरे सुविपुले नीचस्तु भद्रासने ।
कुस्त्री सत्पुरुषं न जातु भजते सा सेव्यते दुर्ज्जनै:,
या यस्य प्रकृतिर्विधात्र-विहिता सा तस्य किं वार्य्यते ॥ ५६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भुजङ्गमे वैद्यनि दुष्टनष्टे,
देहे चिकित्सा-विनिवृत्तरोगे।
हस्तादृगते विदिषि जागरूके,
शस्त्रे प्रकोष्टान्तरित-धृतिका ॥ ५७ ॥
स्फुलिङ्गालिङ्गनात्क्रुद्ध-कृष्णसर्पोपसर्पणात्।
मकरालयपाताच्च कष्टं नृपति-सेवनम् ॥ ५८ ॥
नागोभाति मदेन कं जलरुहैः पूर्णेन्दुना शर्व्वरी,
वाणीव्याकरणेन हंसमिथुनै र्नद्यः सभा पण्डितैः।
शीलेन प्रमदा जवेन तुरगो नित्योत्सवै र्मन्दिरम्,
सत्पुत्रेण कुलं फलैर्व्वसुमती लोकत्रयं शम्भुना ॥ ५९ ॥
इति चाणक्य-राजनीति-शास्त्रे प्रथमोऽध्याय: ॥ १ ॥

—:०:—

द्वितीयोऽध्याय: ।

आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि।
आत्मातु सर्व्वतोरक्ष्य: दारैरपि धनैरपि ॥ १ ॥
आपदर्थे धनं रक्षेत् श्रीमतां कुत आपद:।
कदाचित् कुपिता लक्ष्मी: सञ्चितोऽपिविनश्यति ॥ २ ॥
सर्व्वमेव परित्यज्य शरीरमनुपालयेत्।
शरीरस्य प्रणष्टस्य सर्व्वमेव विनश्यति ॥ ३ ॥
पुनरर्थ: पुनर्दारा: पुनर्भृत्या: पुन: सुखम्।
पुनरन्यानि कर्म्माणि न शरीरं पुन: पुन: ॥ ४ ॥
वरं हि नरके वासो न च दुश्चरिते गृहे।
नरकात् क्षीयते पापं कुगृहात् परिवर्द्धते ॥ ५ ॥
वरं वनं वरं भिक्षा वरं भारोपजीवनम्।
वरं मृत्यु: शरीरस्य नाधिकारेण जीवनम् ॥ ६ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

वरं तेजस्विनो मृत्यु र्नतु मानस्य खण्डनम् ।
मृत्युरेकदिनं हन्ति ह्यपमानं पदे पदे ॥ ७ ॥

वरं दरिद्र: श्रुतिशास्त्रपाठको-
नचार्थयुक्त: श्रुतिशील-वर्ज्जित: ।
सुलोचन: क्षीणपटोऽपि शोभते,
न नेत्रहीन: कनकाम्बलङ्कृत: ॥ ८ ॥

जनस्याश्रयमालोक्य योयथा परितुष्यति ।
तं तथैवानुवर्त्तेत पराराधन-पण्डित: ॥ ९ ॥

चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
नापरीक्ष्य परं स्थानं पूर्व्वमायतनं त्यजेत् ॥ १० ॥

त्यजेत् स्वामिनमत्युग्र मनुग्रात् कृपणन्त्यजेत् ।
कृपणादविशेषज्ञं सर्व्वथा पक्षपाचरम् ॥ ११ ॥

त्यज दुर्ज्जन-संसर्गं भज साधु-समागमम् ।
कुरु पुण्यमहोरात्रं स्मर नित्यमनामयम् ॥ १२ ॥

देशं त्यजेद्वृत्तिहीनं स वृत्तिकं समाविशेत् ।
त्यजेत् कृपणभूपालं शत्रुं सामान्यत-स्त्यजेत् ॥ १३ ॥

अर्थेन किं कृपण-हस्तगतेन तेन,
रूपेण किं गुणपराक्रम-वर्ज्जितेन ।
मित्रेण किं व्यसनकाल पराङ्मुखेन,
ज्ञानेन किं बहु शठादिक-मत्सरेण ॥ १४ ॥

अदृष्टपूर्व्वा बहव: सहाया: सर्व्वे पदस्थस्य भवन्तिवश्या: ।
अर्थैर्व्विहीनस्य पदच्युतस्य भवेद्विकाले स्वजनो हि शत्रु: ॥ १५ ॥

स्थानस्थितस्य पद्मस्य मित्रे सलिलभास्करौ ।
स्थानच्युतस्य तस्यैव क्लेद-दाहकरावुभौ ॥ १६ ॥

आपत्काले महानर्थे दुर्भिक्षे शत्रुसङ्करे ।
राजद्वारे श्मशानेच यस्तिष्ठति स बान्धव: ॥ १७ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आपत्सु मित्रं जानीयाद् रणे शूरं रहः शुचिम्।
भार्य्यां च विभवक्षीणे दुर्भिक्षेच प्रियातिथिम् ॥ १८ ॥
हतं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः,
निर्द्रव्यं पुरुषं त्यजन्ति गणिकाभ्रष्टं स्त्रियं मन्त्रिणः।
पुष्पं पर्य्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः,
सर्व्वः कार्य्यवशाज्जनोऽभिरमते कस्यास्ति को वल्लभः ॥ १९ ॥
लुब्धमर्थ-प्रदानेन क्रुद्धमञ्जलि कर्म्मणा।
मूर्खं कथानु हृत्याच वशीकुर्व्वन्ति पण्डिताः ॥ २० ॥
उत्तमः प्रणिपातेन शूरो भेदेन युज्यते।
नीचः खल्वप्रदानेन समस्तुल्यपराक्रमैः ॥ २१ ॥
यस्य यस्य हि यो भाव स्तस्य तस्य विभाव्यताम्।
अनुप्रविश्य मेधावी तत्तमात्मवशं नयेत् ॥ २२ ॥
प्रस्ताव-सदृशं वाक्यं स्वभाव-सदृशं मनः।
आत्मशक्ति-समं कोपं यो जानाति स पण्डितः ॥ २३ ॥
नखिनाञ्च नदीनाञ्च शृङ्गिनां शस्त्रिणां द्विषाम्।
विश्वासोनैव कर्त्तव्यः स्त्रीषु राजकुलेषु च ॥ २४ ॥
अर्थनाशं मनस्तापं गृह दुश्चरितानिच।
मानञ्चैवापमानञ्च मतिमान् न प्रकाशयेत् ॥ २५ ॥
कस्य दोषः कुलेनास्ति व्याधिना को न पीड़ितः।
को न वा व्यसनं प्राप्तः कस्य श्री र्निश्चला भवेत् ॥ २६ ॥
यस्मिन् कर्म्मणि सिद्धेऽपि लभ्यते न फलोदयः।
असिद्धेतु महद्दुःखं तद्बुधः कथमाचरेत् ॥ २७ ॥
कोऽर्थान् प्राप्य नगर्व्वितो भुवि नरः कस्यापदोऽस्तं गताः,
स्त्रीभिः कस्य न खण्डितं वत मनः को नाम राज्ञां प्रियः।
कः कालस्य मुखान्तरं नच गतः कोऽर्थी गतो गौरवम,
को वा दुर्ज्जन वागुड़ा-निपतितः क्षेमेन यातः पुमान् ॥ २८ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यस्मिन् देशे न सम्मानं न प्रीति र्नच बान्धवाः ।
नच विद्यागमोऽप्यस्ति तत्र वासं न कारयेत् ॥ २८ ॥
धनस्य यस्यास्ति न राजतोवा न चौरतोवापि भयं कदाचित् ।
विद्याख्यमन्तर्द्धनमर्ज्जयेत्तदन्यद्धनं नश्यति सर्व्वमेव ॥ ३० ॥
यदर्ज्जितं प्राणहरैः परिश्रमैर्मृतस्य तत् सम्बिभजन्तिरिक्थिनः ।
कृतच्च यदुस्कृतमर्थलिप्सया तदेव देवोपहृतस्य यौतुकम् ॥ ३१ ॥

सञ्चितं क्रतुषु नोपयुज्यते,
याचितं गुणवते नदीयते ।
तत् कदर्य्य-परिगतं धनम्,
चौर पार्थिव गृहेषु भुज्यते ॥ ३२ ॥

सञ्चितं निहितं भूमौ परामृष्टं मुहुर्मुहुः ।
आखोरिव कदर्य्यस्य धनं दुःखाय केवलम् ॥ ३३
न कल्पते वा परलोक-सिद्धये न कीर्त्तये नापि सुखोपभुक्तये ।
तया मनस्ताप भुवैव किं श्रिया दुर्भार्य्ययैव खपदार्थबन्ध्यया ॥ ३४ ॥

मातेव रक्षति पितेव हिते नियुङ्क्ते,
कान्तेव चाभिरमयत्यपनीय दुःखम् ।
कीर्त्तिञ्च दिक्षु वितनोति ददाति लक्ष्मीम्,
किं किं न साधयति कल्पलतेव विद्या ॥ ३५ ॥

विद्यानाम नरस्यरूपमधिकं प्रच्छन्नगुप्तं धनम्,
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्याऽत्तयं सम्बलम्,
विद्या राजसु पूज्यते वहुधनो विद्याविहीनः पशुः ॥ ३६ ॥

अहेरिवगणाद्भीतो मिष्टान्नाच्च विषादिव ।
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति ॥ ३७ ॥
हन्तुर्याति न गोचरं किमपि शं पुष्णाति सर्व्वात्मना,
ह्यर्थिभ्यः प्रतिपाद्यमान मनिशं विद्यां परां गच्छति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनम्,
येषां तान् प्रतिमान भुञ्जत नृपा: कस्तै: सहस्पर्द्धते ॥ ३८ ॥
किन्तया सुमहत्यापि श्रिया देशान्तरस्थया ।
रिपवो यां न पश्यन्ति सुहृद्भिर्या न भुज्यते ॥ ३९ ॥
दीना विवसना रुक्षा: कपालाङ्कित-पाणय: ।
दर्शयन्तीह लोकाना मदातु: फलमीदृशम् ॥ ४० ॥
दानं भोगो नाशस्तिस्त्रोगतयो भवन्ति वित्तस्य ।
यो न दाति न भुङ्क्ते तस्य तृतीया गति र्नाश: ॥ ४१ ॥
नद्यश्च नार्य्यश्च समस्वभावा: स्वान्तौघभावेन बलाधिकत्वात् ।
तोयैश्च दोषैश्च निपातयन्ति नद्यो हि कूलानि कुलानि नार्य्य: ॥ ४२ ॥
न तृप्तिरस्ति मिष्टानार्मिष्टानां प्रियवादिनाम् ।
सुतानाञ्च सुखानाञ्च जीवितस्य धनस्य च ॥ ४३ ॥
गान्धर्व्वं गन्धसंयुक्तं ताम्बुलं भारती कथा ।
दृष्टा भार्य्या प्रियं मित्रं अपूर्व्वाणि दिने दिने ॥ ४४ ॥
तृप्येन्न राजा धनसञ्चयेन न सागरो भूमि-जलागमेन ।
न पण्डित: साधु-सुभाषितेन तृप्येन्न चक्षु: प्रियदर्शनेन ॥ ४५ ॥
स्वकर्म्म धर्म्माञ्जित-जीविकानाम्,
स्वेष्वेव दारेषु सदारतानाम् ।
जितेन्द्रियाणां अतिथि प्रियाणाम्,
गृहेऽपि मोक्ष: पुरुषोत्तमानाम् ॥ ४६ ॥
मनोऽनुकूला: प्रमदा रूपवत्य: स्वलङ्कृता: ।
वास: प्रासादपृष्ठेषु भवन्ति शुभकर्म्मणाम् ॥ ४७ ॥
निपानमिव मण्डूका: सर: पूर्णमिवाण्डजा: ।
शुभकर्म्माण मायान्ति सहायाश्च धनानिच ॥ ४८ ॥
शनैरर्थ: शनै: पन्था: शनै: पर्व्वतमारोहेत् ।
शनैर्व्विद्या च धर्म्मश्च व्यायामश्च शनै: शनै: ॥ ४९ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation,-Jalgac

ह्याश्वतं विधिवद्दानं शाश्वतं सत्यभाषणम् ।
शाश्वती प्रगुणा विद्या हृद्यं मित्रञ्च शाश्वतम् ॥ ५० ॥
न भोजने विलम्बोस्यात् नच स्यात् स्त्रीषु सेवकः ।
सुदूरमपिविद्यार्थी व्रजेद् गरुड़-वेगवान् ॥ ५१ ॥
ये बालभावे न पठन्ति विद्यां, ये यौवनस्था अधना अधीराः ।
ते शोचनीया इह जीवलोके, मनुष्यरूपेण मृगाश्चरन्ति ॥ ५२ ॥
येषां न विद्या न तपो न दानं, ज्ञानं न शीलं न गुणो न धर्म्मः ।
ते मर्त्यलोके भुवि भारभूताः, मनुष्यरूपेण मृगाश्चरन्ति ॥ ५३ ॥
तर्कोऽप्रतिष्ठः श्रुतयो विभिन्नाः,
नाऽसौ मुनिर्यस्य मतं न भिन्नम् ।
धर्म्मस्य तत्त्वं निहितं गुहायाम्,
महाजनो येन गतः स पन्थाः ॥ ५४ ॥
आकारै रिङ्गितैर्गत्या चेष्टया भाषणेन च ।
नेत्रवक्त्र विकाराभ्यां ज्ञायतेऽन्तर्गतं नृणाम् ॥ ५५ ॥
उदीरितार्थः पशुनापि बुध्यते, हयाश्च नागाश्च वहन्ति चोदिताः ।
अनुक्तमप्यूहति पण्डितो जनः, परेङ्गित ज्ञान फलाहि बुद्धयः ॥ ५६ ॥
केचिद्भयेन विभजन्ति विनीत-भावम्,
अन्येजना विभव-लोभकृत-प्रयत्नाः ।
केचिच्च साधुजन संसदिकीर्त्ति-लोभात्,
सद्भाववान् जगति कोऽपि न साधुरस्ति ॥ ५७ ॥
केचित् स्वभाव गुणिनोऽत्र यथाकपित्याः,
वार्त्ताकु-पाक सदृशा भुवि सन्तिचान्ये ।
दृष्टा उषाणफल तुल्य जड़ा स्तथान्ये,
तेन त्रिधैव भुवन चितयेऽपि सत्त्वाः ॥ ५८ ॥
इति चाणक्य-राजनीति-शास्त्रे द्वितीयोऽध्यायः ॥ २ ॥

—०—

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तृतीयोऽध्यायः ।

योध्रुवाणि परित्यज्य ह्यध्रुवाणिच सेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेवहि ॥ १ ॥

प्रागल्भ्य हीनस्य जनस्य विद्या,
शस्त्रं यथा कापुरुषस्य हस्ते ।
न तुष्टि मुत्पादयते परेषाम् ;
अन्धस्य दारा इव दर्शनीयाः ॥ २ ॥

अग्निहोत्र फला वेदाः शीलवृत्ति फलं श्रुतम् ।
रति पुत्रफला दारा दानशक्ति फलं धनम् ॥ ३ ॥
पालयेत् कुलजां प्राज्ञो विरूपामपि कन्यकाम् ।
सुरूपाच विरूपाच विवाहे सदृशी वधूः ॥ ४ ॥
ययोरेव समं वित्तं ययोरेव समं कुलम् ।
तयोर्विवाहो मैत्रीच नतु पुष्ट-विपुष्टयोः ॥ ५ ॥
इविदेव-कुलादग्राह्यं बालादपि सुभाषितम् ।
अमेध्यात् काञ्चनं ग्राह्यं स्त्रीरत्नं दुष्कुलादपि ॥ ६ ॥
विषादप्यमृतं ग्राह्यं पङ्कादपि सरोरुहम् ।
अरिभ्योऽप्युत्तमा विद्या स्त्रीरत्नमकुलादपि ॥ ७ ॥
सर्वस्मादपि गौर्व्वन्या ग्राह्योवह्निर्यत स्ततः ।
पयोऽपि चर्म्मगं सोमः पुत्रः पूतः स्वदेहजः ॥ ८ ॥
सत्कुले योजयेत् कन्यां मित्रं धर्म्मेण योजयेत् ।
व्यसने योजयेत् शत्रुं पुत्रं विद्यासु योजयेत् ॥ ९ ॥
स्थानेष्वेव नियोज्यानि भृत्याश्चाभरणानि च ।
नहि चूड़ामणिः प्राज्ञैः पादादौ प्रतिबध्यते ॥ १० ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

कुसुम स्तवकस्येव द्वयीवृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्व्व-लोकस्य शीर्य्यते वन एव वा ॥ ११ ॥
चूड़ामणिः समुद्रोर्म्मि-घट्टनात् खण्डनं वरम् ।
अथवा पृथिवी-पाल-मूर्ध्नि पादावसारणम् ॥ १२ ॥
वाजि वारण लोहानां काष्ठ पाषाण वाससाम् ।
नारी पुरुष तोयानां अन्तरं महदन्तरम् ॥ १३ ॥
न सदश्वाः कषाघातं न सिंहोधनगर्जितम् ।
परे रङ्गुलि-निर्द्दिष्टं न सहन्ते मनस्विनः ॥ १४ ॥
सकृदुष्टन्तु यो मित्रं पुनः सन्धातुमिच्छति ।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥ १५ ॥
उपकार-गृहीतेन शत्रुणा शत्रुमुद्धरेत् ।
पादलग्नं करस्थेन कण्टकेनैव कण्टकम् ॥ १६ ॥
उपकार शतेनैव दुर्ज्जनः केन गृह्यते ।
साधुः सम्मानमात्रेण भवत्येवात्म-विक्रयी ॥ १७ ॥
अपकारिषु मा पापं चिन्तयस्व महामते ! ।
स्वयमेवहि नश्यन्ति कूलजाता इव द्रुमाः ॥ १८ ॥
अनर्थोऽप्यर्थरूपेण तथार्थोऽनर्थरूपभाक् ।
उत्पद्यते विनाशाय तस्मादुक्तं परीक्षयेत् ॥ १९ ॥
कार्य्यमालोचितापायं मतिमद्भिर्व्विचेष्टितम् ।
न केवलं हि सम्पत्तौ विपत्तावपि शोभते ॥ २० ॥
विविच्य स्वात्मनैवादौ पश्चाच्च सहधीमता ।
कार्य्यं कुर्य्यान्न सिद्धिश्चेत्तत्रवाच्यो-विधिर्भवेत् ॥ २१ ॥
धन धान्य प्रयोगेषु विद्या संग्रहणेषु च ।
आहार व्यवहारेषु त्यक्तलज्जः सदा भवेत् ॥ २२ ॥
दैवज्ञः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥ २३ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लोकयात्रा भयं लज्जा दाक्षिण्यं धर्म्मशीलता।
तत्रदेशे न वस्तव्यं यत्र नास्ति चतुष्टयम् ॥ २४ ॥
ऋणप्रदाता वैद्यस्तु श्रोत्रियः सजला नदी।
राजा यत्र न विद्यन्ते न कुर्य्यात्तत्र संस्थितिम् ॥ २५ ॥
सुखार्थी च त्यजेद्विद्यां विद्यार्थी च त्यजेत् सुखम्।
न विद्या सुखयोः सन्धि स्तेज स्तिमिरयोरिव ॥ २६ ॥
भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः।
बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥२७॥
ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः।
कृतबुद्धिषु कर्त्तारः कर्त्तृषु ब्रह्मवादिनः ॥२८॥
छायामन्यस्य कुर्व्वन्ति तिष्ठन्ति स्वयमातपे।
फलन्ति च परस्यार्थे सत्पथस्था इव द्रुमाः ॥२९॥
दुर्ज्जनैः सह सङ्गेन सज्जनोऽपि विनश्यति।
जलं प्रसन्नमप्याशु पङ्कः कर्द्दमतां नयेत् ॥३०॥
प्रियंवदेऽपि विश्वासो नकार्य्यो दुर्ज्जने क्वचित्।
धत्तेऽमृतं स जिह्वाग्रे हृदिहालाहलं विषम् ॥३१॥
दुर्ज्जनस्य सुखे प्रीतिर्वाचि चन्दनशीतता।
हृदये तस्य दुर्वुद्धिः कुलिशादपि कर्कशा ॥३२॥
अप्रगल्भाः पदन्यासे जननी राग हेतवः।
सन्त्येते बहुलालापाः कवयो बालका इव ॥३३॥
सफलत्वं सपक्षत्वं आर्ज्जवं गुणसङ्गतिम्।
दर्शयन्तः प्रविशन्तः खला घ्नन्ति शरा इव ॥३४॥
दूरात् सङ्कुचितग्रीवो मन्दं मन्दं प्रभाषते।
शनै रुद्वरते पादमेतद् धूर्त्तस्य लक्षणम् ॥३५॥
आसुखं रमणीयानि मध्ये तु विरसानि च।
अन्ते वैरायमानानि सङ्गतानि खलैः सह ॥३६॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

लब्धे ज्ञाने गुरुं द्वेष्टि मखे पूर्णे तु ऋत्विजम् ।
पुत्रे जाते प्रियां द्वेष्टि कृतकार्य्यो हि दुर्ज्जनः ॥३७॥
तनुरुपकारः साधुषु विकशति परमप्सु तैलविन्दुरिव ।
नीचेष्वसौ महानपि सङ्कुचति यथा घृतं तुहिने ॥३८॥
सहवसतामप्यसतां जलरुह-जलवज्ञवत्यसंश्लेषः ।
दूरेऽपि सतां वसतां भवति हि कुमुदेन्दुवत्प्रीतिः ॥३९॥

कदर्थितस्यापि हि दैन्यवृत्ते-
र्नशक्यते सर्वगुणान् प्रमार्ष्टुम् ।
अधोमुखस्यापि कृतस्य वह्नेः,
नाधः शिखा याति कदाचिदेव ॥४०॥

शत्रोरपत्यानि वशङ्कतानि,
नोपेक्षणीयानि बुधैर्मनुष्यैः ।
तान्येव कालेन विपत्कराणि,
वतासिपत्रादपि दारुणानि ॥४१॥

युद्धेषु भाग्यचपलेषु न मे प्रतिज्ञा,
दैवं यदिच्छति जयञ्चपराजयञ्च ।
एषाहि मे रणगतस्य दृढ़प्रतिज्ञा,
पश्यन्ति यत्र रिपवो जघनं हयानाम् ॥४२॥

न सर्ववित् कश्चिदिहास्ति लोके,
नात्यन्तमूर्खो भुवि कश्चिदस्ति ।
ज्ञानेन नीचोत्तम मध्यमेन,
यो येन जानाति स तेन विद्वान् ॥४३॥

मधुघट शतसिक्ते स्वादुता नास्ति निम्बे,
घृतपल शत होमैः शीतलत्वं न वह्नेः ।
हल शत परिकृष्टे-ऽप्यूषरे नास्ति शस्यम् ;
त्यजति न नीच भावं दुर्ज्जनः सेवितोऽपि ॥ ४४ ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अणुरपिमणिः प्राणत्राणक्षमो विषभक्षणात्
शिशुरपिरुषन् सिंहो सूनुः समाह्वयते गजान् ॥ ४५ ॥
तनुरपि तरुस्कन्धोद्भूतो दहत्यनलोबनम्।
प्रकृतिर्महतां जात्वन्यथा न मूर्त्ति मपेक्षते ॥ ४६ ॥

बरं नरः सत्पुरुषावमानितो
न नीच सन्मान शताभि पूजितः।
वराखपादाभिहतोऽपि शोभते,
न गर्दभस्योपरि भूषिताकृतिः ॥ ४७ ॥

दुःशीलोऽपि द्विजः पूज्यो नतु शूद्रोजितेन्द्रियः।
कः परित्यज्य गां दुष्टां दुह्याच्छीलवतीं खरीम् ॥ ४८ ।
शिशुरपि निपतति सिंहोमदमलिन कपोल भित्तिगजेषु।
प्रकृतिरेव सत्त्ववतां नवय स्तेजसो हेतुः ॥ ४९ ॥
निर्गुणेष्वपि सत्त्वेषु दयां कुर्व्वन्ति साधवः।
नहि संहरते ज्योत्स्नां चन्द्र स्चण्डालवेश्मनः ॥ ५० ॥
कस्या देशात् चपयातितमः सप्तसप्तिः प्रजानाम्,
छायाहेतोः पथि विटपिनामञ्जलिः केनबद्धः।
अभ्यर्थन्ते नवजलमुचः केनवा हृष्टि हेतोः,
जात्यैवैते परहितविधौ साधवो बद्धकाङ्क्षाः ॥ ५१ ॥
खण्डितं कुट्टितं पिष्टं पुनश्चापि द्रवीकृतम्।
तथा न लवणं स्वादु गोव्रजे विकृतिः कुतः ॥ ५२ ॥

अनुचिते विधिकर्म्मणि युज्यते,
शटधिया प्रभुना सगुणो जनः।
भवति नान्यगुणापचयस्ततः,
पदगतस्य किरीट-मणेरिव ॥ ५३ ॥
कनकभूषण संग्रहणोचितः,
यदिमणिः त्रिगुणो प्रतिबध्यते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

न स विरौति न चापि विशोभते,
भवति योजयितुर्वचनीयता ॥ ५४ ॥
आकोपितोऽपि कुलजो नवदत्यवाच्यम्,
निष्पीड़ितो मधुरमेव वमेत्किलेक्षुः ।
नीचो जनो गुणशतैरपि सेव्यमानः,
हास्येषु यद्वदति तत्कलहेषु वाच्यम् ॥५५॥
यत् श्रुत्वैव वहन्त्यन्तः सन्तः सन्तापसन्ततिम् ।
हेलयैव हसन्तस्तत् असन्तः कर्म्मकुर्वते ॥५६॥
क्रुद्धो गुरुर्वदति यानि पदानि शिष्ये,
दावाग्निदाह-सदृशानि भवन्ति तानि ।
तान्येव तत्परिचयेन सुशिक्षितानि,
पश्चाद्भवन्ति कमलाकर-शीतलानि ॥५७॥
हलशतपरिकृष्टेऽप्यूषरे नास्ति शस्यम्,
फलिनि परिचयाप्ते नास्ति सम्प्रीतियोगः ।
मधुररससमेते स्वादुता नास्ति निम्बे,
न स्वगुणविरहिण्यो जातयः सन्तिकाश्चित् ॥५८॥
गुणवन्तोऽपि सीदन्ति न गुणग्राहको यदि ।
सगुणः पूर्णकुम्भो हि यथा कूपे निमज्जति ॥५९॥
यदि भवति विहीनः प्रच्यूतो वा स्वदेशात्,
नहि खलजन-सेवा मर्थयत्युत्तमात्मा ।
न तु तृणमुपभुङ्क्ते स क्षुधार्थोऽपि सिंहः,
पिवति रुधिरमुष्णं प्रायशः कुञ्जराणाम् ॥६०॥
दुर्ज्जनवदन-विनिर्गतवचनभुजङ्गेन सज्जनो दष्टः ।
तद्विषहरणनिमित्तं प्राज्ञः क्षान्त्यौषधं पिवति ॥६१॥
कपिकुलनखमुखमण्डिततरुतलफलभोजनं वरम् ।
न पुनर्धनमदगर्वितमुखभङ्गकदर्थिता वृत्तिः ॥६२॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वरमरण्ये सरितः पुलिनः स्थली,
तरुतले फलमूल-जलाशिनः।
स्थितिरनर्गलबन्धन-वाससो,
न तु मदान्धनराधम-सङ्गमः ॥६४॥

घृतलवणतैलतण्डुलशाकेन्धन-चिन्तया दिनम्।
विपुलमतेरपि पुंसो नश्यति धीर्मन्दविभवत्वात् ॥६२॥

गङ्गातरङ्गजलशीकरशीतलानि,
विद्याधराध्युषितचारुशिलातलानि।
स्थानानि किं हिमवतः प्रणयङ्गतानि,
येनावसानपरपिण्डरता मनुष्याः ॥६५॥

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवम्,
शूरे निर्घृणता ऋजौ विमतिता दैन्यं प्रियालापिनि।
तेजस्विन्यवलिप्तता मुखरता वक्तव्यशक्तिस्थिरे,
सः को नाम गुणोऽनिशं गुणवतां योदुर्जनैर्नेक्षितः ॥६६॥

शक्योवारयितुं जलेन हुतभुक् छत्त्रेण वर्षातपौ,
नागेन्द्रो निशिताङ्कुशेन समदोदण्डेन गोगर्दभौ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषम्,
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥६७॥

पाण्डित्यस्य विभूषणं मधुरता शौर्यस्य वाक्संयमः,
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रेऽर्पणम्।
अक्रोधस्तपसः क्षमा प्रभवतो धर्मस्य निर्व्याजता,
सर्वेषान्तु विशुद्धभावचरितं शीलं परं भूषणम् ॥६८॥

येतावन्मलयोपकण्ठनिलयास्ते घ्विन्धनं चन्दनम्,
तीरोपान्तनिवासिनां जलनिधेः रत्नानि पाषाणवत्।
काश्मीरेषु निवासिनामपि नृणां नास्त्यादरःकुङ्कुमे,
दूरस्थस्य महार्घ्यता परिभवः संजायते जायते ॥६९॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

दुर्ज्जनदुःखितमनसां पुंसां सुजनेषु नास्ति विश्वासः ।
बालः पायसदग्धो दध्यपि फुत्कृत्य-भक्षयते ॥७०॥
पोतो दुस्तरवारिराशितरणे दीपोऽन्धकारागमे,
निर्वाते व्यजनं मदान्धकरिणः शान्त्यै शिरस्यङ्कुशः ।
इत्थं तद्भुविनास्ति यस्य विधिना नोपायसृष्टिः कृता,
कष्टं दुर्ज्जन-चित्तवृत्तिहरणे धातापि भग्नोद्यमः ॥७१॥
सद्वृत्तोऽप्येषजात्यां सरसफलभरो रत्नकान्त्युज्ज्वलश्रीः,
क्लान्तानामार्त्तिहर्त्ताप्यतिशयमधुरास्वादुविश्रामदोऽपि ।
हृद्यन्तर्भिन्नभिन्नानवतिपृथुरहो दाड़िमः कोषगर्भान्,
तत्राश्वास्यन्ति केवाकृतकफलमुखेष्वञ्जसा कर्कशेषु ॥७२॥
रज्वोरप्युपरिभ्रमन्ति कतिचित्तीव्राभियोगक्रमाः ।
तर्कव्याकरणागमादिनिविड़ाभ्यासः कियत्कौशलम् ;
यद्गाढ़ो विनयो यशोयदमलं यद्वीतरागं मनः ।
यत्सौजन्यमखण्डितं सहिगुणस्तेनैव विद्वान् जनः ॥७४॥

इति चाणक्य-राजनीति-शास्त्रे
तृतीयोऽध्यायः ॥३॥

—:०:—

चतुर्थोऽध्यायः ।

पार्थिवस्यैव वक्ष्यामि भृत्यानाञ्चैव लक्षणम् ।
यथाभिज्ञो महीपालः सम्यग्भूतान् प्रपालयेत् ॥१॥
पुष्पं पुष्पं विचिन्वीत मूलच्छेदं नकारयेत् ।
मालाकार इवारामे न यथाङ्गार-कारकः ॥२॥
दुग्ध्वा हि भुज्यते क्षीरं गां विक्रीय न भुज्यते ।
तद्वद् दुग्धप्रयोगेन भोग्यं राष्ट्रं महीभुजा ॥३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

जर्द्धं न क्षीरविच्छेदात् पयोधेनोरवाप्यते।
एवं राष्ट्रात् सुयोगेन पीड़िताच्चाप्यते बलिः ॥४॥
तस्मात् सर्वप्रयत्नेन महीं योगेन पालयेत्।
पालकस्य यशो लोके बलमायुश्च वर्द्धते ॥५॥
लिङ्गपूजनधर्म्मात्मा गोब्राह्मणहिते रतः।
प्रजापालयितुं शक्तः स राजा यो जितेन्द्रियः ॥६॥
राजाकुर्वीत धर्म्मेण धनसञ्चयमेकतः।
अन्यतस्तेन सततं वर्द्धयेदुत्तमान् द्विजान् ॥७॥
ॐकारशब्दो विप्राणां यस्य राष्ट्रे प्रवर्त्तते।
स राजाहि भवेद् योगी व्याधिभिश्च न पीड्यते ॥८॥
अशनार्थं प्रकुर्व्वन्ति सुनयोऽप्यर्थसंग्रहम्।
किं न कुर्वन्ति भूपाला येषां कोशवशाः प्रजाः ॥९॥
सन्धौ विरोधे दाने च यशस्यात्म-सुखोदये।
अपि मोक्षपरिप्राप्ता वर्थो बन्धुर्महीभुजः ॥१०॥
न मनुष्यगणः कश्चिद् दृढ़त्वमतिवर्त्तते।
अरोगभावादन्यच्चस्मृतकल्पाहि रोगिणः ॥११॥
यस्यार्थास्तस्यमित्राणि यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स हि पण्डितः ॥१२॥
धनं जातिर्धनं रूपं धनं विद्या धनं यशः।
किं धनेन विहीनानां याच्चानिर्जीवितैर्गुणैः ॥१३॥
अर्थेन हि विहीनस्य पुरुषस्याल्पमेधसः।
विच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ॥१४॥
रूपं वस्त्रैर्बलं भृत्यैरुत्तमं मानमर्थिभिः।
महाकुल-विवाहैश्च कुलं क्रीणाति वित्तवान् ॥१५॥
वित्तायत्ताः सदा धर्म्माः वित्तं कामनिबन्धनम्।
वित्तायत्तानि वित्तानि वित्तं जीवित बर्द्धनम् ॥१६॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

धनं रूपमवैलक्ष्यं धनं कुलं समङ्गलम् ।
धनं यौवनमम्लानं धनमायुर्निरामयम् ॥१७॥
गुणा धनेन लभ्यन्ते न धनं लभ्यते गुणैः ।
धनी गुणवतां सेव्यो न गुणा धनिनां क्वचित् ॥१८॥
धनिनो जातिहीनस्य विलसत्युत्तमस्तथा ।
अयोमयस्य खड्गस्य स्वर्णं कोषाद्दहिर्यथा ॥१९॥

दृष्टः प्रसिद्धो विबुधो विदग्धः,
शूरः श्रुतिज्ञः कवयः कुलीनाः ।
विलोकयन्तः सधनस्य वक्त्रम्,
जयेति जीवेति सदा वदन्ति ॥२०॥

धनादिधर्म्मः क्रियते धनेन,
धनेन धन्या धनिनो भवन्ति ।
धनं विना कामकथैव नास्ति,
त्रिवर्गमूलं धनमेव नान्यत् ॥२१॥

स्वगृहेऽपि दरिद्राणां विचक्रुः कचकर्कशम् ।
धनिनां परलोकेऽपि प्रेम्नः स्निग्धजनाभुवः ।२२॥

एको हि दोषो गुणसन्निपाते,
निमज्जतीन्दोः किरणेष्विवाङ्कः ।
केनापि नूनं कविना न दृष्टं
दारिद्र्यमेकं गुणराशिनाशि ॥२३॥

कुत आरभ्य घटते विघट्य क्वापि गच्छति ।
गतिर्न शक्यते ज्ञातुं धनस्य च घनस्य च ॥२४॥
धनिनः सुखिनो नित्यं निर्धना दुःखभाजनाः ।
धनिनां निर्धनानाञ्च विभागसुखदुःखयोः ॥२५॥
इदं लब्धमिदं नष्टमिदं लप्स्ये मनोरथम् ।
इदं चिन्तयतामेव जीर्णमायुः शरीरिणाम् ॥२६॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्यजन्ति मित्राणि धनैर्विहीनम्,
पुत्राश्च दाराश्च सुहृज्जनाश्च।
तमर्थवन्तं पुनराश्रयन्तेऽ-
प्यर्थो हि लोके पुरुषस्य बन्धुः ॥२७॥
यत्रोदकं तत्र चरन्ति हंसाः,
तदेव शुष्कं परिवर्ज्जयन्ति।
प्राप्ते जले तत् पुनराश्रयन्ति,
न हंसमित्रेण जलेन भाव्यम् ॥ २८ ॥
चण्डालश्च दरिद्रश्च द्वावेतौ तुलया धृतौ।
एकःस्वबन्धुभिः स्पृश्य स्तैरेव त्यज्यतेऽपरः ॥ २९ ॥
एतदर्थं हि सौमित्रे! राज्यमिच्छन्ति भूभुजः।
यदेषां सर्व्व सकार्य्येषु वाचा न प्रतिहन्यते ॥ ३० ॥
यच्छक्यावप्युपेक्षन्ते किञ्चित्तत्रास्ति कारणम्।
समूल काषं कषितु मुपायोऽसौ न मूढ़ता ॥३१॥
मनस्तापं न कुर्व्वीत विपदं प्राप्य पार्थिवः।
आत्मनश्चोदयं शंसे न्नस्याद्दुःखी सुखी न वा ॥३२॥
धीराः कृच्छ्रमपि प्राप्य न भवन्ति विषादिनः।
प्रविश्य वदनं राहोः किन्नोदेति पुनः शशी ॥३३॥
गोपयेत् स्वानि रन्ध्राणि पररन्ध्राणि चिन्तयेत्।
कुसीदेन निवर्त्तेत राज्यमिच्छन्नृपः स्थिरम् ॥३४॥
लङ्घयेच्छास्त्रमर्य्यादां हेतुवादेन यो नरः।
स नश्यति पुनः क्षिप्रमिह लोके परत्रच ॥३५॥
अक्षेषु मृगयायाञ्च स्त्रीषु पाने ह्यथाटने।
निद्रायाञ्च निबन्धेन क्षिप्रं नश्यति भूपतिः ॥३६॥
एकं चक्षु र्विवेको हि द्वितीयं सत्समागमः।
तौ नस्तो यस्य स क्षिप्रं मोहकूपे पतेद्ध्रुवम् ॥३७॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

जात्यन्धोहि वरं राजा नतु शास्त्र विवर्जितः।
अन्धः पश्यति चारेण शास्त्र हीनो न पश्यति ॥३८॥
गान्धर्व्वं दूतमालेख्यं वाद्यञ्च गुणि-तालकान्।
अर्थ शास्त्रं धनुर्व्वेदं यत्नाद्वेद महीपतिः ॥३९॥
अर्ज्जयेज्ज्ञान मर्थांश्च पुमानमरवत् सदा।
केशेष्विव गृहीतः सन् मृत्युना धर्म्ममाचरेत् ॥४०॥
व्याघ्रोव तिष्ठति जरा परिकर्त्तयन्ती,
रोगाश्च शत्रव इव प्रहरन्ति गात्रे।
आयुः परिस्रवति भिन्नघटादिवाम्भो-
लोको नचात्महित माचरतीति कष्टम् ॥४१॥
मृदु पवन हताग्र कदली दल विन्दुः,
तड़िज् ज्वलन शिखा कलाप शरदम्बुद ध्वनिवत्।
जगदति चञ्चलं सकल मित्यवगम्य बुधाः,
पिवन्ति सुभाषितामृत रसं श्रवणाञ्जलिभिः ॥४२॥
यावत् सुस्थमिदं शरीरमजरं यावज्जरा दूरगा,
यावन्नेन्द्रियशक्तिरप्रतिहता यावत् क्षयोनायुषः।
आत्मश्रेयसि तावदेवहि बुधैः कार्य्यः प्रयत्नोमहान्,
संदीप्ते भवनेऽपि कूपखनन-प्रत्युद्गमः कीदृशः ॥४३॥
क्षणं सम्पदियं सुदुर्ल्लभा,
प्रतिलब्धा पुरुषार्थ साधनी।
यदिनात्र विचिन्वते हितम्,
पुनरप्येष समागमः कुतः ॥४४॥
सत्यं मनोरमः कामः सत्यं रम्या विभूतयः।
किन्तु मत्ताङ्गनापाङ्गभङ्ग लोलं हि जीवितम् ॥४५॥
क्षण क्षयिनि कायेऽस्मिन् अलक्ष्य परिणामिनि।
परोपकार-सारैव जन्मयात्रा शरीरिणाम् ॥४६॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ऐश्वर्य्यमध्रुवं प्राप्यध्रुवे धर्म्मे मतिं कुरु।
क्षणादेव विनाशिन्यः सम्पदोऽप्यात्मना सह ॥४७॥

यथा खरश्चन्दन भारवाही,
भारस्य वेत्ता नतु चन्दनस्य।
तथा जनोऽयं बहु शास्त्रपाठी,
शास्त्रस्य पाठी नतु निश्चयस्य ॥४८॥

मातापित्र-मयो बाल्ये यौवने दयितामयः।
तदपत्यमयः शेषे मूढ़ो नात्ममयः क्वचित् ॥४९॥
येनार्ज्जिता स्त्रियो भृत्याः पुत्रा मित्राणि बान्धवाः।
तेनार्ज्जिता समस्तेयं चतुरन्ता वसुन्धरा ॥५०॥
वश्याः पुत्राश्च भृत्याश्च मन्त्रिणश्च पुरोहिताः।
इन्द्रियाणिच गुप्तानि यस्य श्रीर्वृणुते हितम् ॥५१॥
उद्योगः साहसं धैर्य्यं बुद्धिशक्तिः पराक्रमः।
उत्साहः षड्विधो यस्य तस्य देवोऽपि शङ्कते ॥५२॥
एकं हन्यान्नवाहन्यादिषुर्म्मुक्तो धनुष्मता।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराजकम् ॥५३॥
क्वचिद्दृप्तं क्वचिद्भूमिं क्वचिद्भृत्यान् क्वचिद्बलम्।
दत्वातु साधयेत् कार्य्यं न हानिं परिकल्पयेत् ॥५४॥
लुब्धकेन वनं गत्वा सुतस्यार्थे सुतोहतः।
सर्व्वनाशे समुत्पन्ने ह्यर्द्धं त्यजति पण्डितः ॥५५॥

लोका यथा किल तथा न हि भूपतिः स्यात्,
सद्भूपतिः खलु यथैव तथैव लोकाः।
धर्म्मे प्रवृत्तिरथ तद्विपरीत वृत्तिः,
कृत्स्ने जने नरपतिः प्रभवत्यशेषम् ॥५६॥

राज्ञि धर्म्मिणि धर्म्मिष्ठः पापे पापः समेसमः।
राजान मनुवर्त्तन्त यथा राजा तथा प्रजाः ॥५७॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

अनाथानां नाथो गतिरगतिकानां व्यसनिनाम्,
विनीतो भीतानामभय मधृतीनां भरवशः ।
सुहृदन्धुः स्वामी शरणमुपकारी वरगुरुः,
पिता माता भ्राता जगति पुरुषो यः स नृपतिः ॥५८॥

उत्खातान् प्रतिरोपयन् कुसुमितान् चिन्वन् लघून् बर्द्धयन्,
अत्युच्चान् नमयन् पृथून् विदलयन् विश्लेषयन् संहतान् ।
तीक्ष्णान् कण्टकिनो वहिर्नियमयन् स्वान् रोपितान् पालयन्,
मालाकार इव प्रयोग निपुणो राज्ये चिरं तिष्ठति ॥५९॥

इति चाणक्य-राजनीति-शास्त्रे चतुर्थोऽध्यायः ॥४॥

पञ्चमोऽध्यायः ।

परीक्ष्य प्रथमं भृत्यान् उत्तमाधममध्यमान् ।
योजयेत्तादृग्रेष्वेव नृपतिः खेषु कर्म्मसु ॥१॥

यथा चतुर्भिः कनकं परीक्ष्यतेऽ-
घमर्षण-च्छेदन-ताप-ताड़नैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते,
कुलेन शीलेन गुणेन कर्म्मणा ॥२॥

कुलशीलगुणोपेतः सत्य धर्म्म परायणः ।
रूपेण सुप्रसन्नश्च सेनाध्यक्षो महीपतेः ॥३॥

इङ्गिताकार तत्त्वज्ञो बलवान् प्रियदर्शनः ।
अप्रमादो महार्थश्च प्रतीहारः स उच्यते ॥४॥

मेधावी वाक्पटुः प्राज्ञः सत्यवादी जितेन्द्रियः ।
सर्व्वशास्त्रार्थ तत्त्वज्ञो लिपिज्ञः साधुलेखकः ॥५॥

समानि समशीर्षाणि घनानि बर्त्तुलानि च ।
मात्रासु प्रतिबद्धानि यो जानाति स लेखकः ॥६॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रगल्भोबुद्धिमान् वक्ता परचित्तोपलक्षकः।
धीरो यथोक्तवादी च दूत इत्यभिधीयते ॥७॥
महानदीप्रतरणं महापुरुष विग्रहम्।
महाजन विरोधञ्च दूरतः परिवर्ज्जयेत् ॥८॥
प्रवीणः स्वामी-भक्तश्च सत्यवादी जितेन्द्रियः।
अलुब्धोऽल्पधनैस्तृप्तो गजाध्यक्षो महीपतेः ॥९॥
पिट्ट पैतामहोदक्षः शास्त्रज्ञो मिष्ट पाचकः।
शौचयुक्तः प्रभोर्भक्तः सूपकारोऽभिधीयते ॥१०॥
आयुर्व्वेदकृताभ्यासः सर्व्वत्र प्रियदर्शनः।
दृष्टलक्ष्मीः सुशीलश्च प्राज्ञश्च भिषगुच्यते ॥११॥
ज्ञान विज्ञान सम्पन्नः प्रियवादी जितेन्द्रियः।
सम्यग्विद्योपदेशीच शुचिराचार्य्य उच्यते ॥१२॥
वेदवेदाङ्गतत्त्वज्ञो जपहोम परायणः।
आशीर्व्वादपरो नित्यं पार्थिवस्य पुरोहितः ॥१३॥
लेखकः पाठकश्चैव गणकः प्रतिबोधकः।
ग्रहमन्त्र प्रयोक्ताच कालज्ञो राज्ञ उच्यते ॥१४॥
गणितज्ञो लिपेर्वक्ता श्रुतिस्मृति परायणः।
ब्राह्मणो ग्रहमन्त्रज्ञो देववत्सोऽपिराध्यकः ॥१५॥
अदीर्घसूत्रः स्मृतिमान् कृतज्ञो नीतिशास्त्रवित्।
धीमानायति दर्शीच मन्त्री राज्ञः सुसन्निधिः ॥१६॥
खञ्जः कुब्जो मन्दबुद्धि र्वृद्धोऽसक्तो जितेन्द्रियः।
निष्पृहश्च प्रयोक्ताच राज्ञोऽन्तःपुररक्षकः ॥१७॥
अलसं मुखरं स्तब्धं क्रूरं व्यसनिनं शठम्।
असन्तुष्ट मभक्तञ्च त्यजेद् भृत्यं नराधिपः ॥१८॥
क्रूरं व्यसनिनं लुब्धमप्रगल्भ मनाकृतम्।
दुर्म्मतिं पापकर्म्माणं नाधिकारे नियोजयेत् ॥१९॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

द्विजिह्वमुद्वेगकरं दुर्द्धर्षमतिदारुणम् ।
खलस्याहेश्च वदन मपकाराय केवलम् ॥२०॥

अकारणाविष्कृत वैरदारुणात्,
खलाद्भयं कस्य न नाम जायते ।
विषं महाहेरिव यस्य दुर्व्वचः,
सुदुःसहं सन्निहितं सदासुखे ॥२१॥

तुल्यार्थं तुल्य सामर्थ्यं मन्त्रज्ञं व्यवसायिनम् ।
अर्द्धराज्यहरं भृत्यं यो न हन्यात् स हन्यते ॥२२॥

भ्रातः ! कोकिलकूजितैरलमलं नार्हत्यनाथो गुणम्,
तुष्णीं तिष्ठ विशीर्ण पर्णपटलच्छन्नः क्वचित् कोटरे ।
उद्यानद्रुमवाटिकां कटुरटत् काकावलिः संकुला,
कालोऽयं शिशिरस्य सम्प्रति सखे नायंवसन्तोत्सवः ॥२३॥

भ्रातः ! कोकिल भीत भीत इव किं पत्राद्दतो वर्त्तसे,
नोचेः पश्य सखे ! पुनः पुनरितो धावन्ति लुब्धार्भकाः ।
का भीति स्तव यत् कुहुरिति पुन र्विद्या मधुस्यन्दिनी,
किं क्रूरे गुणगौरवं किमसतीचित्ते पतिप्रेमता ॥२४॥

गाम्भीर्य्ययुक्ता मृदु मन्द वाक्या,
जितेन्द्रियाः सत्यपराः सुयोजनाः ।
भाव्यर्थतज्ज्ञा विदितार्थ तत्त्वाः,
प्रायेण भृत्याः कृतिनां भवन्ति ॥२५॥

निरालस्याः सुसन्तुष्टाः सुखप्राः सुप्रबोधिनः ।
सुख दुःख समा धीरा भृत्या जगति दुर्ल्लभाः ॥२६॥

दम्भाश्रितान् कपटिनो हिंस्रानुत्साहवर्ज्जितान् ।
अशक्तान् भयभीतांश्च राजा भृत्यान् विवर्ज्जयेत् ॥२७॥

घासइन्धनमन्नाजं शस्त्राणि विविधानिच ।
दुर्गे प्रवेशनीयानित्यश सततं शङ्कया ॥२८॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

षण्मासमथवा वर्षं सन्धिं कुर्य्यान्नराधिपः ।
आत्मनोबलमालोक्य पश्चात् शत्रुं निपातयेत् ॥२९॥
मन्त्रिवर्गेषु सारोऽयं दृशि नित्यं प्रसन्नता ।
मुखे वहति माधुर्य्यं हृदये कार्य्य-निश्चयम् ॥३०॥
स्कन्धेनापि वहेत् शत्रुं यावत् कालस्य पर्य्ययः ।
तमेव काले सम्प्राप्ते भिद्याद्घटमिवाश्मनि ॥३१॥
प्राज्ञं नियोजयेत् कार्य्ये ततो राज्ञ स्त्रयो गुणाः ।
यशश्चैव तथा स्वर्गः पुष्कलश्च धनागमः ॥३२॥
नियोजय मूर्खं कार्य्येच राज्ञोदोषास्त्रयस्तथा ।
अयशश्चार्थनाशश्च नरके पतन न्तथा ॥३३॥
यत्किञ्चित कुरुते भृत्यः शुभं वा यदि वाऽशुभम् ।
सुकृतं वर्द्धते तेन राज्ञो दुष्कृत मेव च ॥३४॥
असहायस्य कार्य्याणि सिद्धिं नायान्ति कानिचित् ।
तस्मात् समस्त कार्य्येषु सहायो भूपतेः कृतौ ॥३५॥
गुणवन्तं नियुञ्जीत गुणहीनं विवर्ज्जयेत् ।
पण्डितेषु गुणाः सर्व्वे मूर्खे दोषाश्च केवलाः ॥३६॥
सज्जिरासीत सततं सज्जिः कुर्व्वीत सङ्गतिम् ।
सज्जिर्व्विवादं मैचोच्च नासज्जिः किञ्चिदाचरेत् ॥३७॥
पण्डितैश्च विनीतैश्च धर्म्मज्ञैः सत्यवादिभिः ।
बन्धनेऽपि वसेत् सार्द्धं न तु राजन् खलैः सह ॥३८॥
कार्य्यार्थी सङ्गतिं याति कृतार्थे नास्तिसंगतिः ।
तस्मात् सर्व्वाणि कार्य्याणि सावशेषाणि कारयेत् ॥३९॥
यथाक्रमेण रुह्यन्ति पुष्पेभ्यो मधु षट्पदाः ।
तथावित्तमुपादाय राजा कुर्व्वीत सञ्चयम् ॥४०॥
वल्मीकं मधुजालञ्च शुक्लपक्षे च चन्द्रमाः ।
भिक्षाद्रव्यं नृपद्रव्यं स्तोकं स्तोकेनवर्द्धते ॥४१॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

बज्राहञ्ज्रक्षतं प्रणश्यति भयं श्रो: पद्मरागाङ्गवेत्,
नानाकारमपि प्रशाम्यति विषं गारुत्मतादश्मन: ।
एकैकं क्रियते प्रभावनिचयात् कर्म्मेति रत्नै: सदा,
पुंरत्नैर्मुहुरप्रमेयमहिमोवर्द्धेन किं साध्यते ॥४२॥
अरण्य रुदितं कृतं स्वशरीर मुद्वर्त्तितम्,
स्थलेऽजमवरोपितं सुचिरमुषरे वर्षितम् ।
स्वपुच्छ मवनामितं बधिर कर्ण जापं कृतम्,
कृतान्ध मुखमण्डनायाऽधमो जन: सेवित: ॥४३॥
अज्ञनस्य क्षयं दृष्ट्वा बल्मोकस्य च सञ्चयम् ।
अवन्ध्यं दिवसं कुर्य्याद् दानाध्ययन कर्म्मभि: ॥४४॥
उपकारिषु य: साधु: साधुत्वे तस्य को गुण: ।
अपकारिषु य: साधु: स साधु: सद्भिरुच्यते ॥४५॥
आयात्त्रिभागत: कुर्य्याद् व्यय धर्म्मपरो नर: ।
एतदेवहि पाण्डित्यं यदायादल्पको व्यय: ॥४६॥
बनेऽपि दोषा: प्रभवन्ति रागिणाम्,
गृहेऽपि पञ्चेन्द्रिय-निग्रह स्तप: ।
अकुत्सिते कर्म्मणि य: प्रवर्त्तते,
निवृत्तरागस्य गृह तपोवनम् ॥४७॥
वरं विन्ध्याटव्यामनशन तृषार्त्तस्य मरणम्,
वरं सर्पाकीर्णे तृणपिहित-कूपे निपतनम् ।
वरं भ्रान्तावर्त्ते गहन जलमध्ये विलयनम्,
न शीलस्य भ्रंशो विपुल चरितस्य श्रुतवत: ॥४८॥

इति चाणक्य-राजनीति-शास्त्रे
पञ्चमोध्याय: ॥५॥

—*—

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

षष्ठोऽध्यायः ।

ददध्वं दानमनिशं माऽभुवन् कृपणा जनाः ।
भाग्यक्षयेन क्षीयन्ते नोपभोगेन सम्पदः ॥१॥
कृपणस्य समोदाने न भूतो न भविष्यति ।
अस्पृशन्नेव वित्तानि परेभ्यो यत् प्रयच्छति ॥२॥

चलाविभूतिः क्षणभङ्गि-यौवनम्,
कृतान्तदन्तान्तरवर्त्ति-जीवनम् ।
तथाप्यवज्ञा परलोक साधने-
ष्वहोनृणां विस्मयकारि चेष्टितम् ॥३॥

अर्थाः पादरजः समा गिरि नदी वेगोपमं यौवनम्,
मानुष्यं जल लोल-विन्दुचपलं फेणोपमं जीवनम् ।
धर्म्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनम्,
पश्चात्तापहतो जरा परिणतः शोकाग्निनादह्यते ॥४॥
देहि देहीति वदतो देहि देहीति याचतः ।
एकमेव वचस्तत्र कियतो सारफल्गुता ॥५॥
न प्रदानैः क्षयं यान्ति नोपभोगेन सम्पदः ।
पूर्व्वार्जितानामन्यत्र सुकृतानां क्षयं विना ॥६॥
भाग्यवान् जायतां पुत्रो माशूरो माच पण्डितः ।
शूराश्च कृतविद्याश्च वने शुष्यन्ति मत्सुताः ॥७॥
एतेचापीन्द्रतुल्याः क्षितिपतितनया भीमसेनार्জ্জুनाद्याः,
शूराः सत्यप्रतिज्ञा दिनकररुचयः केशवेनोपगूढ़ाः ।
ते दृष्टापात्र हस्ता जगति कृपणवद् भैक्षचर्य्यानुयाताः,
कः शक्तो भालपट्टे विधिकर लिखिताङ्कं लेखां प्रमार्ष्टुम् ॥८॥

क्रुद्धोऽपि कः कस्य करोति दोषम्,
तुष्टोऽपि कः कस्य गुणं करोति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

स्वकर्म्म-सूत्रैर्ग्रथिता हि सर्व्वे,
कर्त्ता करोतीति वृथाभिमानः ॥८॥
यन्मनोरथगतेरगोचरम्,
यत्स्पृशन्ति न गिरः कवेरपि ।
स्वप्नवृत्तिरपि यत्र दुर्लभा,
हेलयैव विदधाति तद्विधिः ॥१०॥
ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे,
विष्णुर्येन दशावतार निचये क्षिप्तो महान् सङ्कटे ।
रुद्रो येन पिनाक पाणिरनिशं भिक्षाचरः कल्पितः,
सूर्य्यो भ्राम्यति यद्गुणेन गगने तस्मै नमः कर्म्मणे ॥११॥
दातावलिर्याचनको मुरारिः,
दानं महीराजि मखस्य मध्ये ।
दातुः फलं बन्धन मेव दृष्टम्,
नमोऽस्तुदैवाय यथेष्ट कर्त्रे ॥१२॥
माता यदि भवेल्लक्ष्मीः पिता यदि जनार्द्दनः ।
नार्थ सम्प्रतिपत्तिः स्याद्विना प्राक् पुण्य कर्म्मणा ॥१३॥
आसीमान्तान्निवर्त्तन्ते सुहृदः सह बन्धुभिः ।
सुकृतं दुष्कृतं वापि गच्छन्त मनुगच्छति ॥१४॥
सहजर्द्वितयोर्नास्ति सम्बन्धः प्राणकाययोः ।
पुत्रमित्र कलत्रेषु सम्बन्धेतु कथैव का ॥१५॥
नो तत्र कश्चिदनुयाति सुहृद्बबन्धुः,
नार्थः प्रयत्न निचितो न च भृत्यवर्गः ।
यस्मिन् क्षणे प्रियशतानि विसृज्य पुंसाम्,
प्राणाः स्वकर्म्म फलभोग-धनाः प्रयान्ति ॥१६॥
लब्धा जन्म सहश्रिया स्वयमपि त्रैलोक्यभूषाकरः,
स्थित्यर्थं क्षितिकण्ठमप्युपगत स्तेनापि मूर्द्धाधृतः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पूर्णः शीतकरस्तथापिजरति क्षीणं परं प्रत्यहम्,
प्रायः प्राक्तनकर्म्म एव बलवत् कस्योपकुर्व्वीतकः ॥१७॥
उत्पतन्त्वन्तरीक्षं वा पातालं प्रविशन्तुवा।
चरन्तु च दिशः सर्व्वा अदत्तं नोपलभ्यते ॥१८॥
दुर्गं त्रिकुटः परिखा समुद्रो-
रक्षांसि योधा धनदश्च भृत्यः।
सञ्जीवनी यस्य मुखाग्र विद्या,
स वारणः कालवशादिपन्नः ॥१९॥
नैवान्तरीक्षे न समुद्र मध्ये,
न पर्व्वतानां विवर प्रदेशे।
नोवा स्वदेशे भुवि किञ्चिदस्ति,
यत्र स्थितं कर्म्म न बाधते स्वम् ॥२०॥
नमस्यामोदेवान्ननुहतविधे स्तेपि वशगाः,
विधिर्व्वन्द्यः सोऽपि प्रतिनियत कर्म्मैक फलदः।
फलं कर्म्मायत्तं किममरगणैः किञ्च विधिना,
नम स्तत् कर्म्मभ्यो विधिरपि न येभ्यः प्रभवति ॥२१॥
पुराधीता च या विद्या पुरा दत्तञ्च यद्धनम्।
पुराकृतञ्च यत् कर्म्म ह्यग्रे धावति धावति ॥२२॥
भवितव्यं भवत्येव कर्म्मणामिह निश्चयः।
अभाव्यं न भवत्येव चित्ते किं खिद्यसे वृथा ॥२३॥
आगमिष्यन्ति ते भावा ये भावा मयि भाविनः।
मया तैरनुगन्तव्यं न तेषा मन्यतो गतिः ॥२४॥
अघटितं घटनां नयति ध्रुवम्,
सुघटितं क्षणभङ्गुर-चापलम्।
जगदिदं कुरुते सचराचरम्,
विधिरहो बलवानिति मे मतिः ॥२५॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

शशिदिवाकरयोर्ग्रहपीड़नम्,
गजभुजङ्गमयोरपि बन्धनम् ।
मतिमतां च विलोक्य दरिद्रताम्,
बिधिरहो बलवानिति मे मतिः ॥२६॥

स एवाहं पार्थस्तदपि बरलब्धं धनुरिदम्,
तएवामोबाणाः प्रमथितसुरारातिचृतनाः ।
समस्ता वृष्णीनां हलधरमुखानां युवतयो-
क्रियन्ते गोपालैर्बिधिरथबलोयान्नपुरुषः ॥२७॥

इयं कटीमत्तगजेन्द्रगामिनी,
विचित्रसिंहासनसंस्थिता सदा ।
अनेकरामाजनलालिता परम्,
बिधेर्वशात् सैकवती प्रजार्थिनी ॥२८॥

सप्तसे पुरुषत्वेऽपि करपद्मं शिरोदरे ।
एकः प्रभुःपरोदास इति दैवं विजृम्भितम् ॥२९॥

कर्म्माण्येव प्रधानानि न नक्षत्रं नवाग्रहाः ।
वशिष्ठदत्तलग्नापि जानकीदुःखभागिनी ॥३०॥

न पितुः कर्म्मणा पुत्रो न पितापुत्रकर्म्मणा ।
स्वकृतेनैव सम्पत्तिं विपत्तिं चोपभुञ्जते ॥३१॥

कर्म्मजाः प्रभवन्त्येव यथाकालमुपद्रवाः ।
एतत्तु कष्टं यत् शत्रुः कर्त्ताहमिति मन्यते ॥३२॥

अनिच्छिन्नपि चित्तेन विदेशेऽपि मानवः ।
स्वकर्म्मोत्पातवातेन नीयते यत्र तत्फलम् ॥३३॥

कर्म्मणा तच्चकारेण मनुष्यो यन्तु पुत्रिकः ।
बासनारज्जुमाकृष्य सर्वकर्म्मसु चोदितः ॥३४॥

प्राग्दत्तमर्थं लभते मनुष्यो,
दैवोऽपि तं वारयितुं न शक्तः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्मान्न शोचामि न विस्मयो मे,
यदस्मदीयं न हि तत्परेषाम् ॥३५॥
वने रणे शत्रुजलाग्निमध्ये,
महार्णवे पर्व्वतमस्तके वा।
सुप्तं प्रबुद्धं विषमस्थितं वा,
रक्षन्ति कर्माणि पुराकृतानि ॥३६॥
न देवा यष्टिमादाय रक्षन्ति पशुपालवत्।
यं हि रक्षितुमिच्छन्ति धिया संयोजयन्ति तम् ॥३७॥
धर्म्महेतोस्त्यजेदर्थं न धर्मस्त्वर्थकारणात्।
इहैव हि त्यजत्यर्थो धर्मोऽमुत्रापि तिष्ठति ॥३८॥
अर्थार्थी यानि कष्टानि सहते कृपणो जनः।
तान्येव यदि धर्मार्थी न पुनः क्लेशभाग्भवेत् ॥३९॥
सर्वेषामेव शौचानामर्थ शौचं प्रशस्यते।
योऽर्थे शुचिः स हि शुचिर्न मृद्भारैः शुचिः शुचिः ॥४०॥
सर्वभूतदया शौचं शौचमिन्द्रियनिग्रहः।
सत्यं शौचं मनःशौचं जलशौचन्तुपञ्चमम् ॥४१॥
न मृद्भारसहस्रेण नोदकुम्भशतेन च।
पञ्चगव्यघटैर्वापि भावदुष्टो न शुद्धयति ॥४२॥
प्रसन्नचित्तः स्वयमेव तुष्यति,
प्रभुः शिवश्चार्द्दलप्रपूजनात्।
न कोटिसौवर्णकुशेशयार्च्चनात्,
अशुद्धबुद्धिः शरदां शतैरपि ॥४३॥
न काष्ठे विद्यते देवो न पाषाणे न मृण्मये।
भावेषु विद्यते देवस्तस्माद्भावो हि कारणम् ॥४४॥
यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम्।
विद्यातपश्च कीर्त्तिश्च स तीर्थफलमश्नुते ॥४५॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

न प्रहृष्यति सम्मानैर्नावमानैः प्रकुप्यते ।
गाङ्गोदकमिवाक्षय्यो यः स पण्डित उच्यते ॥४६॥
दरिद्रस्य मनुष्यस्य प्राज्ञस्यायति-दर्शिनः ।
हितमप्युचितं वाक्यमवलिप्तैर्न गृह्यते ॥४७॥
क्वचिद्भूमौ शेते क्वचिदपि च पर्य्यङ्कशयने,
क्वचिच्छाकाहारी क्वचिदपि च मांसोदनरुचिः ।
क्वचित् कन्थाशाली क्वचिदपि विचित्राम्बरधरः,
मनस्वी कार्य्यार्थी गणयति न दुःखं न च सुखम् ॥४८॥
जिह्वे ! वदसि निःस्नेहं मधुरं किं न भाषसे ।
मधुरं वद कल्याणि ! लोकोऽयं मधुर-प्रियः ॥४९॥
किं किं नोपकृतं तेन किं न दत्तं महात्मना ।
प्रियं प्रसन्नवक्त्रेण प्रथमं येन भाषितम् ॥५०॥
बाल्ये वयसि यः शान्तः स शान्त इति कथ्यते ।
धातुषु क्षीयमाणेषु शमः कस्य न जायते ॥५१॥
बाल एवाचरेद्धर्म्ममनित्यं खलु जीवितम् ।
फलानामिव पक्वानां शश्वत्पतनतोभयम् ॥५२॥
पश्य धर्म्मस्य माहात्म्यं क्रियमानस्य नित्यशः ।
आत्मनः कुरुते श्रेयो लोकस्य भवति प्रियः ॥५३॥
यथाकाष्ठञ्च काष्ठञ्च समेयातां महोदधौ ।
समेत्य च व्यपेयातां तद्वज्जन्तु-समागमः ॥५४॥
न मन्त्रेण न वीर्य्येण न धिया पुरुषेण च ।
अलभ्यं लभते जन्तु स्तत्रका परिदेवना ॥५५॥
सम्भूतः पञ्चधाकायो यदि पञ्चत्वमाप्नुयात् ।
कर्म्मभिः स्वात्मचरितैस्तत्रकापरिवेदना ॥५६॥
यौवनं जरयाग्रस्तमारोग्यं व्याधिपीड़ितम् ।
मृत्युर्ग्रसति भूतानि किं धीर इव भाषसे ॥५७॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इच्छन्ति केचिन्नरकेषु वासम्,
नेच्छन्ति केचिन्नरकेषु वासम्।
श्रेयो हि तस्मान्नरकं विशिष्टम्,
न गर्भवासात् परमं हि दुःखम् ॥५८॥

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत!।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥५९॥

एकस्यार्थप्रयातानां सर्वेषां तत्रगामिनाम्।
एकस्येत्त्वरितं याति तत्र का परिवेदना ॥६०॥

एकविंशतिनिर्दिष्टा नरकाः शास्त्रपारगैः।
गर्भवास-समोपे ते कलां नार्हन्ति षोड़शीम् ॥६१॥

शीतमुष्णं क्षुधा तृष्णा गर्भवासेषु दारुणाः।
गर्भवासात्ते नान्यत् कष्टात् कष्टतरं महत् ॥६२॥

क्रामः क्रोधस्तथा लोभो देहे तिष्ठन्ति तस्कराः।
ते मुष्णन्ति जगत् सर्वं तस्माज् जाग्रतजाग्रत ॥६३॥

यो हि मानुष्यमासाद्य कर्म्मभूमिं सुदुर्लभाम्।
न करोत्यात्मनः श्रेयः स पश्चात् परितप्यते ॥६४॥

मातुर्गर्भपरिभ्रष्टो मग्नः संसारसागरे।
दुःखेन लभते जन्म मानुष्ये च पुनः पुनः ॥६५॥

एकत्रचे यथा रात्रौ नानापक्षि-समागमः।
प्रातर्दशदिशो यान्ति तद्वद्भूत-समागमः ॥६६॥

दुःखं परं बालकचेष्टितञ्च,
मध्यं हि चान्तं जरया निरस्तम्।
एतानि दुःखानि बहूनि लोके,
चित्राणि संस्मृत्य न किञ्चिदिष्टम् ॥६७॥

दृष्टा बालकचेष्टा यौवनदर्पोऽथबद्धवैराग्यम्।
सापि गता सोपि गतस्तदपि गतं स्वप्नमामेयम् ॥६८॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

अहो भार्य्या अहो पुत्रः अहो आत्मा अहो सुखम् ।
अहो माता अहो भ्राता पश्य मायाविमोहितम् ॥६८॥
कस्य माता कस्य पिता कस्य बन्धुर्महामुने ! ।
विभ्रमस्य स्मृतिभ्रंशात्तेन मुह्यन्ति जन्तवः ॥७०॥

अर्थं धिगस्तु बहुवैरिकरं नराणाम्,
राज्यं धिगस्तु भयदं बहुचिन्तनीयम् ।
स्वर्गं धिगस्तु पुनरागमन प्रवृत्तिम्,
धिग् धिक् शरीरमपि रोग-समाश्रयञ्च ॥७१॥

बीजं पिता क्षेत्रमहो जनित्री,
बन्धूनि कर्माणि शुभाशुभानि ।
भूतानि पश्य प्रतिमानि लोके,
जातानि यातानि च तानि तानि ॥७२॥

आधूमादिनिवर्त्तन्ते सुहृदो बान्धवैः सह ।
येन ते सह गन्तव्यं तत्कर्मसुकृतं कुरु ॥७३॥
गृहादर्था निवर्त्तन्ते श्मशानान्मित्रबान्धवाः ।
येन ते सह गन्तव्यं तत्कर्म सुकृतं कुरु ॥७४॥
अज्ञानबलखड्गेन प्रसुप्तो नरगर्दभः ।
कः समर्थः प्रबोद्धुं तं ज्ञानभेरीशतैरपि ॥७५॥
मनोरथः पिता नित्यं धृतिर्माता श्रुतिःसखा ।
व्यवसायश्च मे भ्राता इत्येते मम बान्धवाः ॥७६॥
प्रातःमूत्रपुरीषाभ्यां मध्याह्ने क्षुत्पिपासयोः ।
क्षमाः कामेन बाधन्ते निद्रया निशि जन्तवः ॥७७॥
पुरन्दर सहस्राणि चक्रवर्त्ति शतानि च ।
प्रवासितानिकालेन प्रदीप इव वायुना ॥७८॥
अज्ञानेनावृतो लोको लोभेन च वशीकृतः ।
सङ्गेन बहुभिर्नष्टः तेन स्वर्गं न गच्छति ॥७९॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गृहेऽप्यर्थान् परित्याज्य श्मशाने मित्रबान्धवान्।
नग्नश्चरिक्तहस्तश्च प्रयाति भूषितो यथा ॥८०॥
जराव्याधिश्च मृत्युश्च यदि नस्यादिदं त्रयम्।
तदा संसारभोगेऽस्मिन् कामं राजतु मे मनः ॥८१॥
अहीन्द्रान् पातालाद्विषमिव निमज्योद्धरति यः।
यश्चारुह्य खगं कवलयति सेन्द्रान् सुरगणान्
महीं भ्रान्त्वा भ्रान्त्वा रघु नलनृपा येन विजिताः।
स मृत्युः कालं न क्षमत इति माकार्ष्टमनसि ॥८२॥
न बालेषु स्नेहं वहति न जरत्खादरनवम्,
न दाक्षिण्यच्छाया युवतिषु न शास्त्रेषु करुणा।
यएवं निःसीमा तरुणहृदयः पीनकठिनः,
स मृत्युः कालं न क्षमत इति माकार्ष्टमनसि ॥८३॥
परिहर मनसा सुवर्णचिन्ताम्,
कुरु हरिपूजनमेव सारम्।
यम भटकरपतितानां नराणाम्,
भवति न हेमशतैः क्षणं विमुक्तिः ॥८४॥
नासा तो निर्गमस्यापि श्वासस्य च महामुने!
प्रवेशे प्रत्ययो नास्ति प्रातरागमनं कुतः? ॥८५॥
अरे! वद हरेर्नाम क्षेमधामक्षणेक्षणे।
वहिर्नियाति निःश्वासो विश्वासः को निवर्त्तने ॥८६॥
न प्राप्तकालो म्रियते विद्धः शरशतैरपि।
कुशाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति ॥८७
लभ्यव्यान्येव लभते गन्तव्यान्येव गच्छति।
प्राप्तव्यान्येव प्राप्नोति दुःखानि च सुखानि च ॥८८॥
अप्रार्थितानि दुःखानि यथैवायान्ति देहिनाम्।
सुखान्यपि तथामन्ये दैवमत्रातिरिच्यते ॥८९॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

अशोच्यमानानि यथा पुष्पाणि च फलानि च ।
स्वयं स्वकाले पच्यन्ते तथा कर्माणि देहिनाम् ॥९०॥
नैवाकृतिः फलति नैव कुलं न शीलम्,
विद्या सहस्रगुणितापि न वाग्विशुद्धिः ।
भाग्यानि पूर्वतपसा खलु सञ्चितानि,
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥९१॥
न भवेद्दुर्विपाकेऽपि प्रल(ण)यः समयं विना ।
प्रसूनमप्यसून् हन्ति जन्तोः प्राप्ताब्धेः पुनः ॥९२॥
किञ्चा कुलेन विपुलेन गुणैश्च तैस्तैः,
शौर्य्येण कृत्यमिह नास्ति न च श्रुतेन ।
कर्माणि पूर्व्वविहितानि फलन्ति काले,
दैवेन यानि लिखितानि ललाटपट्टे ॥९३॥
यथा धेनुसहस्रेषु वत्सोविन्दति मातरम् ।
तथा पूर्व्वकृतं कर्म कर्त्तारमनुविन्दति ॥९४॥
खलः सर्षपमात्राणि परच्छिद्राणि पश्यति ।
आत्मनो विल्वमात्राणि पश्यन्नपि न पश्यति ॥९५॥
पानीयं वा निरायासं स्वाद्यन्नं वा भयोत्तरम् ।
विचार्य्य खलु पश्यामि पानीयं निर्भयं सुखम् ॥९६॥
सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः ॥९७॥
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
सुखं दुःखं मनुष्याणां चक्रवत् परिवर्त्तते ॥९८॥
शशिनि खलु कलङ्कः कण्टकं पद्मनाले,
युवति कुचनिपातः पक्वता केशजाले ।
उदधिजलमपेयं पण्डितं निर्द्धनत्वम्,
वयसि धवियोगो निर्व्विवेको विधाता ॥९९॥

इति चाणक्य-राजनीति-शास्त्रे षष्ठोऽध्यायः ॥६॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सप्तमोऽध्यायः ।

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
अवस्थातः प्रजायन्ते मित्राणि रिपवस्तथा ॥१॥
शोकारातिभयत्राणं प्रीतिविश्रम्भ-भाजनम् ।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥२॥
न मातापितृदारेषु सोदरेषु न बन्धुषु ।
विस्रम्भस्तादृशः पुंसां यादृङ् मित्रे निरन्तरम् ॥३॥
मित्राणि तानि विदूरेषु भवन्ति यानि,
ते पण्डिताजगति ये पुरुषान्तरज्ञाः ।
त्यागी स यः क्षुधनोपिहि सम्विभागी,
कार्य्यं विना भवति यः स परोपकारः ॥४॥
कश्चिन्माला समं मित्रं कश्चिन्मित्रं महीसमम् ॥५॥
त्यजेन्माला समं मित्रं त्यजेन्मित्रं तुलासमम् ।
त्यजेन्मेरु समं मित्रं ग्राह्यं मित्रं महीसमम् ॥६॥
सुहृदि निरन्तरचित्ते गुणिनि कलत्रे प्रभौ विशेषज्ञे ।
विश्राम्यतीव हृदयं दुःखस्य निवेदनं कृत्वा ॥७॥
यदीच्छेच्छाश्वतीं प्रीतिं त्रीन् दोषान् परिवर्जयेत् ।
द्यूतमर्थप्रयोगञ्च तं विना दारदर्शनम् ॥८॥
शतास्यादिकलो मित्रं सहस्रादपि केकरः ।
काणः शतसहस्राद्धा मन्दश्मश्रुर्न कस्यचित् ॥९॥
मात्रास्वस्रादुहित्रा वा न विविक्तासनोवसेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥१०॥
अतिचण्डाऽनिलोद्भूततरङ्गस्य महोदधेः ।
शक्यते प्रसभं रोधः नानुरक्तस्य चेतसः ॥११
नम्रनोतोपमा वाणी करुणा कोमलं मनः ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

एक वीजप्रजातानां भवत्यवनतं शिरः ॥१२॥
अग्निरापः स्त्रियो मूर्खः सेना राजकुलं तथा ।
संयोगसेवनाभ्याच्च सद्यःप्राण-हराणि षट् ॥१३॥

न जारजातस्य ललाट-शृङ्गम्,
न सत्कुलीनस्य करेऽस्तिपद्मम् ।
यदा यदा मुञ्चति दुष्टवाक्यम्,
तदा तदा पश्यति जारजातम् ॥१४॥

अत्यासन्ना विनाशाय दूरस्था न फलप्रदाः ।
सेव्या मध्यमभावेन राजावह्निर्गुरुः स्त्रियः ॥१५॥
पराधीना निद्रा परपुरुषचित्तानुसरणम्,
मुदा शून्यं हास्यं रुदितमपि शोकेन रहितम् ।
पणे न्यस्तःकायः करजदशनैर्भिन्नवपुषाम्,
अहो कष्टाद्वृत्तिर्जगति गणिकानां बहुभया ॥१६॥

किञ्चित्वं यदि शब्दशास्त्रकुशलो विप्रो भवेत् पण्डितः,
किञ्चित्वं यदि दण्डनीति-निपुणो राजा भवेदु धार्म्मिकः ।
तच्चित्वं यदि रूपयौवनवतो साध्वी भवेदङ्गना,
तच्चित्वं यदि निर्द्धनोऽपि पुरुषः पापं न कुर्य्यात् क्वचित् ॥१७॥
नात्मच्छिद्रं परे दद्यात् परच्छिद्राणि लक्षयेत् ।
गूहेत् कूर्म्मइवाङ्गानि परभावं परीक्षयेत् ॥१८॥

पातालतलवासी च वारिप्राकार-निर्गतः
यदि न स्वाङ्कुरोद्भेदो विषः केनोपलभ्यते ॥१९॥
शङ्कनीयो हि सौमित्रे ! विश्वस्तोऽपि विभीषणः ।
यस्य न स्वजनप्रीतिः कूतस्तस्य परे जने ॥२०॥
न तथा बाधते शत्रुः कृतवैरोऽपि राघव ! ।
यथा भिनत्ति मर्म्माणि तीक्ष्णः स्वजनकण्टकः ॥२१॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न तावदन्यजातीयश्छिनत्ति परशु स्तरुम्।
न यावत्तरुजातीयं वृन्तं तस्य निबध्यते ॥२२॥
कोकिलानां स्वरो रूपं लज्जारूपं कुलस्त्रियः।
विद्यायाः पटुतारूपं रूपं मूर्खस्य मौनता ॥२३॥
कोकिलस्य स्वरो रूपं नारीरूपं पतिव्रतम्।
विद्यारूपं कुरूपाणां क्षमारूपं तपस्विनाम् ॥२४॥
न विश्वसेदमित्रञ्च मित्रञ्चापि न विश्वसेत्।
कदाचित् कुपितं मित्रं सर्वं गुह्यं प्रकाशयेत् ॥२५॥
न विश्वसेदविश्वस्ते विश्वस्ते नाति विश्वसेत्।
विश्वासाद्भयमुत्पन्नं मूल्यान्यपि निकृन्तति ॥२६॥
पठनाच्च तपस्वी च शूरश्चाप्यकृतव्रणः।
मध्यमा स्त्रीसतीचेति राजन् न श्रद्दधाम्यहम् ॥२७॥

शाठ्येन मित्रं कपटेन धर्म्मम्,
परोपतापेन समृद्धि-भारम्।
सुखेन विद्यां पुरुषेण नारीम्,
वाञ्छन्ति ये नूनमपण्डितास्ते ॥२८॥

क्षुत्पतनजृम्भासु स्थानादायुः प्रकुप्यते।
अतस्तत् प्राप्तये कुर्य्याज् जीवोत्तिष्ठाङ्गलिध्वनिम् ॥२९॥

न विश्वसेत् पूर्वपराजितस्य,
शत्रोश्च मित्रत्वमुपागतस्य।
दग्धां गुहां पश्य उलूकपूर्णाम्,
काकप्रलीनेन हुताशनेन ॥३०॥

वृद्धां स्त्रियं नवं मद्यं शुष्कमांसार्द्रमूलकम्।
रात्रौ वारि दिवास्वप्नं विषवत् परिवर्ज्जयेत् ॥३१॥
विषं वेश्म दरिद्रस्य वृद्धस्य तरुणी विषम्।
अशिक्षिता विषं विद्याऽप्यजीर्णे भोजनं विषम् ॥३२॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

प्रियं गीतमकण्ठस्य वृत्तस्य तरुणी प्रिया ।
प्रियं दानं दरिद्रस्य नीचस्योच्चासनं प्रियम् ॥३३॥

बालातप:पर्व्वणि मैथुनञ्च,
श्मशानधूमो मठभोजनञ्च ।
रजस्वलाबस्त्रनिरीक्षणञ्च,
सुदीप्तमप्यायुरभिद्रवन्ति ॥३८॥

शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा सद्य:प्राण-हराणि षट् ॥३५॥
सद्य: पक्वं घृतं द्राक्षा बालास्त्री चीरभोजनम् ।
उष्णोदकं तरुच्छाया सद्य:प्राणकराणि षट् ॥३६॥
सद्योबलकराण्याहु: स्नानं चीराशनं पय: ।
सद्योबलहराण्याहुरध्वानं मैथुनं जरा ॥३७॥
भू-गृहं वरनारी च कार्पासं नागजं जलम् ॥
शीतकाले भवेदुष्टं उष्णकाले च शीतलम् ॥३८॥
शुष्कं मांसं पयो मौनं भार्य्या मित्रसुतै: सह ।
न भक्षयेत् प्रियैर्जातु वियोगं कुरुते क्षणात् ॥३९॥

कुचेलिनं दन्तमलोपधारिणम्,
महाशनं निष्ठुरवाक्यभाषणम् ।
सूर्य्योदये चास्तमये च शायिनम्,
जहाति लक्ष्मीरपि चक्रधारिणम् ॥४०॥

चत्वारि घोररूपाणि सन्ध्याकाले परित्यजेत् ।
आहारं मैथुनं निद्रां स्वाध्यायञ्च विवर्ज्जयेत् ॥४१॥
आहाराज्जायते व्याधिर्मूढ़गर्भश्च मैथुनात् ।
अलक्ष्मी: शयनाच्चैव स्वाध्यायादायुष: क्षय: ॥४२॥
सन्ध्यायां गर्ज्जिते मेघे शास्त्रचिन्तां करोति य: ।
चत्वारि तस्य नश्यन्ति ह्यायुर्विद्या यशो बलम् ॥४३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मिथ्याच्छेदस्तृणानां क्षितिनखलिखनं पादयोरल्पपूजा।
दन्तानामल्पशौचं बसनमलिनतारूक्षतामूर्द्धजानाम्,
सन्ध्यायां बह्निसेवा शिरसिविकषणं संहताभ्यां कराभ्यां,
खाङ्गे पीठे च वाद्यं हरति धनपतेः केशवस्यापिलक्ष्मीम् ॥४४॥
स्नानं नाम मनःप्रसादजननं दुःखप्रविध्वंसनम्,
शौचस्यायतनं मलापहरणं सम्बर्द्धनं तेजसः।
रूपोद्योतकरं रिपुप्रमथनं कामाग्निसन्दीपनम्,
नारीनाञ्च मनोहरं श्रमहरं स्नाने दशैते गुणाः ॥४५॥
ताम्बूलं कटुतिक्तमिश्रमधुरं क्षारं कषायान्वितम्,
पित्तघ्नं कफनाशनं क्रमिहरं दुर्गन्धिनिर्नाशनम्।
वक्त्रस्याभरणं विशुद्धिकरणं कामाग्निसन्दीपनम्
ताम्बूलस्य सखे! त्रयोदशगुणाः स्वर्गेऽपि तद्दुर्लभम् ॥४६॥

कामं प्रदीपयति रूपमभिव्यनक्ति,
सौभाग्यमावहति वक्त्रसुगन्धिताञ्च।
ओजः करोति कफजांश्च निहन्ति रोगान्,
ताम्बूलमेव खपरांश्च गुणान् करोति ॥४७॥

शिरः सुधौतं चरणौ सुनिर्मलौ,
वराङ्गनासेवनमल्पभोजनम्।
अनग्नशायित्वमपर्व्वमैथुनम्,
चिरप्रणष्टां श्रियमानमन्ति षट् ॥४८॥

येन केन हि पुष्पेण पाण्डुरेण विशेषतः।
शिरसा धार्य्यमाणेन ह्यलक्ष्मीः प्रतिहन्यते ॥४९॥
दीपस्य पश्चिमच्छाया च्छायाशय्यासनस्य च।
रजकस्य च यत्क्षेत्रमलक्ष्मीस्तत्र तिष्ठति ॥५०॥
गजाश्वरथधान्यानां गवामपि रजः शुभम्।
अशुभन्तु विजानीयात् खरोष्ट्र महिषीरजः ॥५१॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

गवां रजो धान्यरजः पुत्तस्याङ्गगतं रजः ।
रजांस्येतानि पुण्यानि पापमेभिः प्रणश्यति ॥५२॥
अजाविगर्दभोष्ट्राणां मार्जारमूषिकस्य च ।
रजांस्येतानि पापानि सर्व्वतः परिवर्ज्जयेत् ॥५३॥
शूर्पवात नखाग्राम्बु स्नानवस्त्रचूतोदकम् ।
शिवनिर्माल्यकेशाम्बु पुण्यं हन्ति पुराकृतम् ॥५४॥
वैरिणा सह सन्धाय विश्वस्तो यः स्वपेत् स्वयम् ।
स वृक्षाग्रे कृतः स्वप्नः पतितः प्रतिबुध्यते ॥५५॥

य एव राजन् ! मृदुमन्दभाषी,
स एव दूरात् परिवर्ज्जनीयः ।
अभ्राद्विमुक्तस्य दिवाकरस्य,
मरीचयस्तीक्ष्णतरा भवन्ति ॥५६॥

मृदुनैव मृदुं हन्ति मृदुना हन्तिदारुणम् ।
नासाध्यं मृदुना किञ्चित् तस्मात्तीक्ष्णात् परो मृदुः ॥५७॥
क्षमाबलमशक्तानां शक्तानां भूषणं क्षमा ।
क्षमावशीकृतो लोकः क्षमया किं न साध्यते ॥६२॥
नात्यन्तसरलैर्भाव्यं गत्वा पश्य वने तरून् ।
छिद्यन्ते सरलास्तत्र कुब्जाः सन्ति पदे पदे ॥५८॥
क्षुर-स्नानप्रयाणेषु नववस्त्रादि-सङ्गमे ।
नक्षत्रग्रहमङ्गल्यमुपेक्षेत विचक्षणः ॥६०॥

विपदि धैर्य्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता युधिविक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥६१॥
गजतुरगशतैः प्रयान्तु मूर्खाः,
धनहीना विबुधाः प्रयान्तुपङ्गुताम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गिरिशिखरगंतापि काक-पङ्क्तिः,
पुलिनगतैर्न समेति राजहंसैः ॥६२॥
यद्वित्ताढ्याः प्रखलपुरुषाः साधवो वित्तहीनाः,
नास्मिन्नर्थे वचनपटुभिर्निन्दनीया खलश्रीः।
वित्तभ्रष्टो गणयति समान् कस्तृणेनापि मूर्खान्,
विद्वांसस्तु प्रकृतिसुभगाः कस्य नाभ्यर्हणीयाः ॥६३॥
नित्यं प्रमुदिता मूर्खा ज्ञानविज्ञानवर्जिताः।
पण्डिता नित्यशोकार्था ज्ञानाङ्कुशवशीकृताः ॥६४॥
अपात्रे रमते नारी गिरौ वर्षति वासवः।
खलमाश्रयते लक्ष्मीः प्राज्ञःप्रायेण निर्धनः ॥६५॥
लक्ष्मीर्लक्षणहीनेऽस्ति जातिहीने सरस्वती।
अपात्रे रमते नारी गिरौ वर्षति वासवः ॥६६॥
विधेः कन्यायुग्मं सुगतिरपरा दुर्गतिरभूत्,
तयोराद्यं मोहात् कुलगुण-विहीनाय स ददौ।
ततः पश्चात्तापादिव तदनुजां दातुमधुना,
कुलीनं विद्वांसं वरमिह वरेण्यं वरयते ॥६७॥
षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णोऽपि धार्य्यते।
द्विकर्णस्य तु मन्त्रस्य ब्रह्माऽप्यन्तं न गच्छति ॥६८॥
तया गवा किं क्रियते यानदोग्ध्री न गर्भिणी।
कोऽर्थः पुत्त्रेण जातेन यो न विद्वान् न धार्मिकः ॥६९॥
एकेनापि सुपुत्त्रेण विद्यायुक्तेन साधुना।
कुलमुज्ज्वलते सर्व्वं चन्द्रेण गगनं यथा ॥७०॥
मूषिको गृहजातोऽपि हन्तव्योऽनुपकारकः।
घृतप्रदानैर्मार्जारो हितकृत्प्रार्थ्यतेऽन्यतः ॥७१॥
वीणावंशश्चन्दनं चन्द्रभासः,
चन्द्राभासा यौवनस्था रमण्यः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

नैतद्रम्यं क्षुत्पिपासातुराणाम्,
सर्वारम्भास्तण्डुल-प्रस्थमूला: ॥७२॥
अण:पूर्वं बृहत् पश्चाद् भवत्यार्येण सङ्गति: ।
विपरीतमनार्य्येण यथेच्छसि तथा कुरु ॥७३॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वनमामोदते सर्वं सुपुत्रेण कुलं यथा ॥७४॥
वरमेको गुणीपुत्रो निर्गुणेन शतेन किम् ।
एकश्चन्द्रस्तमो हन्ति न च तारासहस्रश: ॥७५॥
केचिन्मृगमुखा व्याघ्रा: केचिद्व्याघ्रमुखा मृगा: ।
तत्स्वरूपविपर्य्यस्ताद् विश्वासोह्यापदां पदम् ॥७६॥
द्विषन्तौ पितरौ मन्ये पुत्रो याभ्यां न पाठित: ।
न शोभते सभामध्ये हंसमध्ये बको यथा ॥७७॥
लालयेत् पञ्चवर्षाणि दशवर्षाणि ताड़येत् ।
षोड़शे वत्सरे प्राप्ते पुत्रे मित्रवदाचरेत् ॥७८॥
जायमानो हरेद्दारान् बर्द्धमानो हरेच्छ्रियम् ।
म्रियमाणो हरेत् प्राणान् नास्ति पुत्रसमो रिपु: ॥७९॥
पुत्र: स्यादिति दु:खिन: सतिसुते तस्यामयैर्दु खिन:,
तद्दत्ताशनचिन्तयाऽप्यसुखिनस्तन्मौर्ख्यतो दु:खित: ।
जोवेदित्यपि दु:खिनो यदि मृत: प्राणान्तकं दु:खिन:,
पुत्रव्याजमुपागतो रिपुरसौ मा जायतां कस्यचित् ॥८०॥
यस्य पुत्रा न विद्वान्सो न शूरा न च धार्मिका: ।
सान्धकारं कुलं तस्य नष्टचन्द्रेव शर्व्वरी ॥८१॥
निशायां दीपकश्चन्द्र: प्रभाते दीपको रवि: ।
पृथिव्यां दीपको राजा सुपुत्र: कुलदीपक: ॥८२॥
एतदेवायुष: सारं निसर्गं क्षणभङ्गिन: ।
स्निग्धै र्मुग्धै र्विदग्धै श्च यदयन्त्रितमास्यते ॥८३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विभृयादनुजान् सर्वान् ज्येष्ठभ्राता यथा पिता।
पुत्रवच्चानुवर्त्तेरन् कनिष्ठा अग्रजन्मनः ॥८४॥
सङ्घातः श्रेयसो मूलं स्वजनस्य विशेषतः।
तुषमात्रे पृथग्भिन्ने तण्डुलं न प्ररोहति ॥८५॥
बहुनामप्यसाराणां समवायो हि दुःसहः।
तृणैराविष्कृता रज्जुस्तया हस्त्यपि बध्यते ॥८६॥
अपहृत्य परस्यार्थं तेन धर्मं करोति यः।
स दाता नरकं याति यस्यार्थस्तस्य तत्फलम् ॥८७॥
देव-द्रव्य विनाशेन ब्रह्मस्वहरणेन च।
तद्वनं कुलनाशाय भवेदात्मक्षयाय च ॥८८॥
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकान् ॥८९॥
ब्रह्मघ्ने च सुरापे च स्तेने च गुरुतल्पगे।
निष्कृतिर्विद्यते राजन् कृतघ्ने नास्ति निष्कृतिः ॥९०॥
मित्रद्रुहः कृतघ्नस्य स्त्रीघ्नस्य पिशुनस्य च।
चतुर्णां वयमित्येषां निष्कृतिं नैव शुश्रुम ॥९१॥
यान्ति न्यायप्रवृत्तस्य तिर्य्यञ्चोपि सहायताम्।
अपस्थानन्तु गच्छन्तं सोदरोऽपि विमुञ्चति ॥९२॥
ब्रह्महा वृत्तिहा चैव द्वावेतौ तुलयाधृतौ।
ब्रह्महा मुच्यते कल्पैर्वृत्तिहा नतु मुच्यते ॥९३॥
नाश्नन्ति पितरः पिण्डं नाश्नन्ति वृषलीपतेः।
स्त्रीजितस्य च नाश्नन्ति यस्योपगृहिणी गृहे ॥९४॥
मरणायैव जायन्ते म्रियन्ते जन्मने पुनः।
न परात्मोपकाराय तृणानीवेतरे जनाः ॥९५॥
तण्डुलाः स्वर्णवद् यत्र व्रीहयो यत्र रत्नवत्।
पक्वान्नं भस्मवद् यत्र तत्र शक्र! वसाम्यहम् ॥९६॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

बाजिनो यत्र तत्राहं यत्राहं तत्रबाजिनः ।
न ते यत्र न तत्राहं नाहं यत्र न तत्रते ॥९७॥

चित्तायत्तं धातुबद्धं शरीरम्,
चित्ते नष्टे धातवो यान्ति नाशम् ।
तस्माच्चित्तं सर्व्वतो रक्षणीयम्,
सुस्थेचित्ते वृद्धयः सम्भवन्ति ॥९८॥

आहारार्थं कर्म्म कुर्य्यादनिन्द्यम्,
कुर्य्यात्तच्च प्राण-सन्धारणार्थम् ।
प्राणाधार्य्या तत्त्वविज्ञानहेतोः,
तत्त्वं ज्ञेयं येनभूयो न जन्म ॥९९॥

इति श्रीचाणक्य-राजनीतिशास्त्रे
सप्तमोऽध्यायः ॥७॥

—※—

अष्टमोऽध्यायः ।

धर्म्मः प्रव्रजितस्तपः प्रचलितं सत्यञ्चदूरङ्गतम्,
पृथ्वी मन्दकला जनाः कपटिनोरौद्रेस्थिता ब्राह्मणाः ।
राजा दण्डकरो विचाररहितः पुत्राःपितुर्द्वेषिणः,
भार्य्याभर्त्तृविरोधिनी कलियुगे धन्यानरायेस्मृताः ॥१॥

देशस्तस्करदूषितोगतघृणो राजा दया दुर्ज्जने-
ष्वायासः स्वजनेषु दुर्नयरतोलोको भयञ्चाध्वनि ।
मित्रं च्छिद्ररतं गुणेष्वगुणता क्रूरेधनं बान्धवाः,
निःस्नेहा वत वच्चनापि तनये स्वास्थ्यं शरीरे कुतः ॥२॥

बुद्धिः पौरुषमार्ज्जवं गुणरति र्विद्याकुलं सेवनम्,
कालेऽस्मिन् विकलत्वमेव सकलं ह्येतत् पुरः स्वामिनाम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यो दोषः कुरुते परस्य मुखरं धीरस्य यो रोधको,
यः पापद्रविणस्य बर्द्धनकरस्तेषां भवेत् स प्रियः ॥३॥
अतिक्रान्तः कालः सुचरितशतामोद सुभगो-
गताः शुक्लाधर्म्मा नवनलिन-सूत्रांशु तनुताम्।
परिम्लानः प्रायो बुधजनकथा-सारनिपुणो-
निरानन्दं जातं जगदिदमतीतोत्सवमिव ॥४॥
धन्यास्ते ये न पश्यन्ति देश-भङ्गं कुलक्षयम्।
परचित्तरतां नारीं पुत्रञ्च व्यसने स्थितम् ॥५॥
परान्नं परवस्त्रञ्च परशय्यां परस्त्रियम्।
परवादं परद्रव्यं दूरतः परिवर्ज्जयेत् ॥६॥
खण्डं खण्डञ्च पाण्डित्यं क्रय क्रौतञ्च मैथुनम्।
भोजनञ्च परायत्तं तिस्रः सुंसां विड़म्बनाः ॥७॥
आसनाच्छयनाच्चैव संजल्पात्सह भोजनात्।
पुंसांसंक्रमते पापं घटादुघटमिवोदकम् ॥८॥
अश्वाजरादेहवतां पर्व्वतानां जलं जरा।
असम्भोगश्च नारीनां वस्त्रस्याच्चालनं जरा ॥९॥
दुर्ज्जनाः कलिमिच्छन्ति सन्धिमिच्छन्ति साधवः।
उत्तमा मानमिच्छन्ति मानोहि महतां धनम् ॥१०॥
मानोहि मूलमर्थस्य माने स्नाने धनेन किम्।
महतो मानहीनस्य जीवनाद् मरणं वरम् ॥११॥
अतिदानाद्बलिर्बद्धोह्यतिमानात् सुयोधनः।
अति कामाद्दशग्रीवोह्यति सर्व्वत्र गर्हितः ॥१२॥
नाभिषेको न संस्कारः सिंहस्य क्रियते वने।
विक्रमार्ज्जितसत्वस्य स्वयमेव मृगेन्द्रता ॥१३॥

वणिक् प्रमादी भृतकश्च मानी,
भिक्षु र्विलासी विधनश्च कामी।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

वेश्याङ्गना चा प्रिय वादिनी च,
प्रजापतेर्दुश्चरितानि पञ्च ॥१४॥
दातादरिद्रः सधनश्च लोभी,
सेव्यः कदर्य्य स्तनयोऽविधेयः ।
परोपकाराभिरतस्य मृत्युः,
प्रजापतेर्दुश्चरितानि पञ्च ॥१५॥
कान्तावियोगः स्वजनापमानः,
कन्या विशीला स्वजनस्य सेवा ।
दरिद्रभावात् प्रविसुञ्च मित्रम्,
विनाग्निना पञ्च दहन्ति तीव्रम् ॥१६॥
वश्याः सूता वित्तकरीच विद्या,
नारी कथा सज्जन-सङ्गतिश्च ।
इष्टाच भार्य्या वशवर्त्तिनीच,
दुःखस्यमूलोद्धरणानि पञ्च ॥१७॥
कुरङ्ग-मातङ्ग-पतङ्ग-भृङ्ग-
मीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न हन्यः,
यः सेवते पञ्चभिरेव पञ्च ॥१८॥

विमाननंदुश्चरितानुकीर्त्तनं कथाभिघातो वचनेषु विस्मयः ।
अदृष्टदानं कृतपूर्व्वनाशनं विरक्त भावस्य नरस्य लक्षणम् ॥१९॥
स्निग्धं पश्यति सुस्मितं कथयति हस्तेन हस्तं स्पृशन्,
मोक्तुं नेच्छसि पार्श्वतो विलुणुते कर्त्तव्यमन्तर्गतम् ।
दोषान् सम्वृणुते गुणान् कथयते नोयाचिते खिद्यते,
शंसामेव परोक्ष माचरतियत् स्नेहस्यतल्लक्षणम् ॥२०॥
अधीरः कर्कशस्तब्धः कुचेलः स्वयमागतः ।
एते पञ्च नपूज्यन्ते दृहस्पति समाअपि ॥२१॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पर्व्वतारोहणेतोये गोकुलेश्वान-विग्रहे।
पतितस्य समुत्थाने यष्टेः पञ्चगुणाः स्मृताः ॥२२॥
अभ्रच्छाया खलप्रीति वेंश्यारागोविभूतयः।
महीभुजां प्रसादश्च पञ्चैते चञ्चलाः स्मृताः ॥२३॥
अजायुद्धं द्विजश्राद्धं प्रभाते मेघडम्बरम्।
दम्पत्योः कलहश्चैव क्षणमेकं भविष्यति ॥२४॥
अस्थिरं जीवितं लोके यौवनं धनमस्थिरम्।
अस्थिरं पुत्र दारादि धर्म्मः कीर्त्तिर्यशः स्थिरम् ॥२५॥
दानमर्थार्हतं वाक्यात् कीर्त्तिधर्म्मौ च चेतसः।
देहात् परोपकारश्च संसारात् सारमुद्धरेत् ॥२६॥
भूत जीवित मत्यल्पं राचिस्तस्यार्द्धहारिणी।
व्याधिशोक-जरायासैरर्द्धन्तदपि निस्फलम् ॥२७॥
आयुर्व्वर्षशतं नृणां परिमितं रात्र्या तदर्द्धं हृतम्,
तस्यार्द्धस्य च किञ्चिदेव जरया बान्येन किञ्चिद् हृतम्।
किञ्चिद्व्याधिवियोग दुःखरमणैर्भूपालसेवादिभिः,
नष्टंशिष्टमतस्तरङ्गतरलं पुंसां सुखं क्वचणे ॥२८॥

अहित हित-विचार शून्यबुद्धेः,
श्रुति समयैर्बहुभिर्व्वहिष्कृतस्य।
उदर भरणमात्रे केवलेच्छोर्मनुज-
पशोश्च पशोश्च को विशेषः ॥२९॥
आहार निद्रा भयमैथुनञ्च,
सामान्य मेतत् पशुभिर्नराणाम्।
एको विवेक स्वधिको मनुष्ये,
तेनैवहीनः पशुभिः समःस्यात् ॥३०॥

गच्छतस्तिष्ठतोवापि जाग्रतः स्वपतोऽपिवा।
यत्र भूतहितार्थाय तत् पशोरिव चेष्टितम् ॥३१॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

नोपकाराय सुहृदां नापकाराय वैरिणाम् ।
जननी गर्भभाराय मूढ़ानां जन्म केवलम् ॥३२॥
पूर्व्वं यैर्नकृतं सुतीर्थ मरणं विप्रान सन्तर्पिताः,
हव्यं नैव हुतं हुताशनमखे नाराधितः शङ्करः ।
दत्तं नैवहिरण्यमत्र बसनं गावस्तिलामेदिनी,
तेतिष्ठन्ति कुचेलभक्त विधना नित्यं नरादुखिताः ॥३३॥
नोपात्तं द्रविणं कुलं नगणितं मित्रं नचोपार्ज्जितम्,
शास्त्रं नाधिगतं तपो न चरितं न क्रोड़ितं बाजिभिः ।
कान्ताकोमलपल्लवाधर रसं पीतं न चन्द्रोदये,
तारुण्यङ्गतमेव निष्फलतया शून्यालये दीपवत् ॥३४॥
सजातोयेन जातेन यातिवंशः समुन्नतिम् ।
परिवर्त्तिनि संसारे परैर्जातैर्मृतैश्चकिम् ॥३५॥
दाने तपसि शौर्य्येवायस्य न प्रथितं यशः ।
विद्यायामर्थलाभेच मातुरुच्चार एवसः ॥३६॥
यस्य त्रिवर्गशून्यानि दिनानि यान्तिदेहिनः ।
स लोहकार भस्त्रेव श्वसन्नपि नजीवति ॥३७॥
यज्जीवितं क्षणमपि प्रथितं मनुष्ये,
विज्ञान विक्रम यशोऽभिरम्यमानम् ।
तन्नाम जीवितमिह प्रवदन्ति सन्तः,
काकोऽपि जीवति चिराय बलिञ्च भुङ्क्ते ॥३८॥
धनं धर्म्मश्च विद्याचरूपं शीलङ्कुलन्तथा ।
सुखमायुर्यश्चैव नवगोप्यानि यत्नतः ॥३९॥
असत्यस्य वणिक् मूलं शाखा तस्य वराङ्गना ।
कामस्तत् पत्र पुष्पाणि फलानि दूत कारकः ॥४०॥
यथा यथाहि पुरुषः कल्याणे कुरुते मतिम् ।
तथा तथास्य सर्व्वार्थाः सिध्यन्ति नात्र संशयः ॥४१॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मङ्गलात् श्रीः प्रभवति प्रागल्भ्यात् प्रकटी भवेत्।
तद्रक्षा कुरुते मूलं संयमात् स्थैर्यमश्नुते ॥४२॥
तावद्भयाद्विभेतव्यं यावद्भय मनागतम्।
आगतन्तु भयं दृष्ट्वा प्रहर्त्तव्यमभीतवत् ॥४३॥
आयत्यां गुण दोषज्ञ स्तदात्वे क्षिप्रनिश्चयः।
अतीते कार्य्य शेषज्ञः शत्रुभिर्नाभिभूयते ॥४४॥
नोपेक्षितव्योविदुषा शत्रुरल्पबलोऽपिसन्।
वह्निरल्पोऽपि संवृद्धः भस्मसात् कुरुते वनम् ॥४५॥
ऋण शेषोऽग्निशेषश्च शत्रु शेष स्तथैवच।
पुनः पुनः प्रवर्द्धन्ते तस्मात्रिः शेषमाचरेत् ॥४६॥
अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारापहारोच षडेते आततायिनः ॥४७॥
आततायिन मायान्तमपि वेदान्त पारगम्।
जिघांसन्तं जिघांसीयान्नतेन ब्रह्महाभवेत् ॥४८॥
नाततायि-वधेदोषः कर्त्तुर्भवति कश्चनः।
कृतं प्रति कृतं कुर्य्याद् हिंसितं प्रति हिंसितम् ॥४९॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्ज्जयेत् कुटिलं बन्धुं विष कुम्भं पयोमुखम् ॥५०॥

तद्भोजनं यद् द्विज भुक्त शेषम्,
स बुद्धिमान् यो न करोति पापम्।
स वैसुहृद् यो न वदेत् परोक्षम्,
दम्भं विना यत् कुरुते स धर्म्मः ॥५१॥
क्लिष्टं वृथा यत् तपसा न तीर्थे,
दत्तं वृथा यत् क्षुधिते न पात्रे।
भुक्तं वृथा नो रुचिरं न पथ्यम्,
मृत्युर्वृथा यद् न रणेन तीर्थे ॥५२॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

पृष्ठतोऽर्कं निषेवेत जठरेण हुताशनम् ।
स्वामिनं सर्व्व भावेन परलोक ममायया ॥५३॥

न सा सभा यत्र न सन्ति वृद्धाः,
वृद्धा न ते ये न वदन्ति धर्म्मम् ।
धर्म्मः सनो यत्र न सत्यमस्ति,
सत्यं न तद् यच्छल-दोष युक्तम् ॥५४॥
तन्मङ्गलं यत्र मनः प्रसन्नम्,
तज्जीवनं यत्र परोपकारः ।
तदर्ज्जितं यद् द्विजभुक्तशेषम्,
तद् गर्ज्जितं यत् समरे नियुक्तम् ॥५५॥

तज्ज्ञानं यदगर्व्वितं स पुरुषोयःखिद्यते नेन्द्रियैः,
तद्दानं यदकत्थनं सविभवो यः साधु साधारणः ।
सा श्रीर्या नमदं करोति स सुखी यो नोद्यते तृष्णया,
तन्मित्रं यदयन्त्रितं स उदयो लोकोपकाराय यत् ॥५६॥
यत्रनिर्यन्त्रण सुखं यत्रविश्वास भाजनम् ।
यत्रनिर्ब्बाज सस्नेहं रिपुत्वं तत्र सौहृदम् ॥५८॥
आचारो ग्रामवासान्तो गृहान्ता प्रभुतास्त्रियः ।
नृपश्रीर्ब्रह्मशापान्ता फलान्तं ब्रह्म वर्च्चसम् ॥५९॥
सर्वोच्चयान्ता उदयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तञ्च जीवितम् ॥६०॥
यज्ञोनश्यत्यसत्येन तपः क्रोधेन नश्यति ।
आयुर्विप्रावमानेन दानञ्च परिकीर्त्तनात् ॥६१॥
गतश्रीर्गणकान्द्वेष्टि गतायुश्च चिकित्सकान् ।
गतायुश्च गतश्रीश्च ब्राह्मणान् द्वेष्टि भारत ! ॥६२॥
यदीच्छेत् पुनरागन्तुं नातिदूरमनुव्रजेत् ।
उदकान्तान्निवर्त्तेत स्निग्धच्छायाच्चपादपात् ॥६३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अनायकाविनश्यन्ति नश्यन्ति बहुनायकाः।
स्त्रीनायका विनश्यन्ति नश्यन्ति शिशुनायकाः ॥६४॥

अर्थातुराणां न सुहृन्नबन्धुः,
कामातुराणां न भयं न लज्जा।
विद्यातुराणां न सुखं न निद्रा,
क्षुधातुराणां न बपुर्नतेजः ॥६५॥

कुतो निद्रा दरिद्रस्य परप्रेष्यकरस्य च।
परनारी प्रसक्तस्य परद्रव्यहरस्य च ॥६६॥

सुखं स्वपिति निश्चिन्तः प्रसारित पदद्वयः।
मानभङ्ग करी कन्या कुले यस्य न जायते ॥६७॥

स्थिरः सुहृद् भृत्य जयोऽनुकूलः,
स्वामी गुणज्ञः सुखितश्च देशः।
पत्नी सती यस्य कुले न कन्या,
प्रसार्य पादौ स सुखेन शेते ॥६८॥

स्थानभ्रष्टान पूज्यन्ते दन्ताः केशानखानराः।
स्थानस्थिताश्च शोभन्ते पवित्रत्वं भजन्ति ते ॥६९॥

कण्टकस्य विमार्गस्य दन्तस्य गणितस्य च।
अमान्यस्य च दुष्टस्य मूलादुद्धरणं सुखम् ॥७०॥

शीतलं चन्दनं लोके चन्दनादपि चन्द्रमाः।
चन्द्र चन्दनयोर्मध्ये शीतलः साधुसङ्गमः ॥७१॥

प्राप्ताः श्रियः सकल कामजुषस्ततः किम्,
दत्तं पदं शिरसिविद्विषतां ततः किम्।
सन्तर्पिताः प्रणयिनो विभवैस्ततः किम्,
कल्पं स्थितिः तनुभृतां तनुभिः ततः किम् ॥७२॥

सर्व्वाः समपत्तयः तस्य सन्तुष्टं यस्य मानसम्।
उपानद्गूढ़ पादस्य ननुचर्म्मावृतेव भूः ॥७३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

सुवर्णं पुष्पां पृथिवीं चिन्वन्ति पुरुषाः स्त्रिया ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥७४॥
नाच्छादयति कौपीनं न दंशं मशकापहम् ।
शुनः पुच्छमिवानर्थं पाण्डित्यं धर्म्मबर्ज्जितम् ॥७५॥
आचारः कुलमाख्याति देशमाख्याति भाषितम् ।
सम्भ्रमः स्नेहमाख्याति वपुराख्याति भोजनम् ॥७६॥
हृथा वृतिः समुद्रस्य हृथा तृप्तस्य भोजनम् ।
हृथा दान मपात्रेषु नीचस्योपकृतिर्हृथा ॥७७॥
दूरस्थोऽपि समीपस्थो यो वैमनसि वर्त्तते ।
हृदये यो नवर्त्तेत समीपस्थोऽपिदूरतः ॥७८॥
गिरीकलापो गगने पयोदः,
लक्षान्तरे भानुर्ज्जलेच पद्मम् ।
इन्दु र्द्विलक्षे कुमुदस्य वन्धुः,
योयस्य हृद्यो नहि तस्य दूरम् ॥७९॥
नच भवतिवियोगो दुःख विच्छेदहेतोः,
जगति गुणनिधीनां सज्जनानां कदाचित् ।
घनपटलनिरुद्धो दूरसंस्थोपिचन्द्रः,
किमु कुमुदवनानां प्रेम भङ्गं करोति ॥८०॥
सर्व्वेषामेव रत्नानां स्त्रीरत्नं रत्न मुत्तमम् ।
तदर्थं रत्ननिचयं तस्मिन् त्यक्ते धनेन किम् ॥८१॥
जयोधरित्र्याः परमेव सारम्,
परं गृहं सद्मनि देव देशः ।
तत्रापि शय्या शयने वरास्त्री,
रत्नोज्ज्वला राज-सुखस्य सारम् ॥८२॥
आकारं विनिगूह्य तां रिपुबलं जेतुं समुत्तिष्ठताम्,
तन्त्रं चिन्तयतां कृताकृत शत-व्यापार-शाखाकुलम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मन्त्रि प्रोक्तनिषेधिनां क्षितिभुजामाशङ्कितां सर्व्वतः,
दुःखाम्भोनिधिवर्त्तिनां सुखलवं कान्तासमालिङ्गनम् ॥८३॥
श्रुतं दृष्टं स्मृष्टं स्मृतमपि हृदाल्हाद जनकम्,
नरत्नं स्त्रीभ्योऽन्यत् क्वचिदपि कृतं लोक पतिना ।
तदर्थं धर्म्मार्थौ सुतविषय सौख्यानिच ततः,
गृहेलक्ष्म्योमान्याः सतत सवलाः सन्तिविभवैः ॥८४॥
धिक् तस्य मूढ़मनसः कुकवेः कवित्वम्,
यः स्त्रीमुखञ्च शशिनञ्च समी करोति ।
भ्रुभङ्ग विभ्रम कटाक्ष निरीक्षणानि,
क्षेप प्रसादहसितानिकुतः शशाङ्के ॥८५॥
असारे खलु संसारे सारं सारङ्ग लोचना ।
तदर्थं धनमिच्छन्ति तत् त्यागेन धनेन किम् ॥८६॥
नूनंहिते कविवरा विपरीत बोधाः,
येनित्यमाहुरबला इति कामिनीनाम् ।
याभिर्विलोलतरतारक दृष्टिपातैः,
शक्रादयोऽपिविजिता ह्यवलाः कथं ताः ॥८७॥
शीतांशोयदिसौरभं यदि भवेदिन्दीवरे रक्तिमा,
माधुर्य्यं यदि विद्रुमे तरलता कन्दर्पचापेयदि ।
रम्भायां यदि विप्रतीपवलनं लब्धोपमानं तदा,
तद्वक्त्रं तदिहेक्षणं तदधर स्तद्भ्रुस्तदूरुद्वयम् ॥८८॥
अबलेति परीवादो वृथाहि हरिणी दृशाम् ।
यासां नेत्र निपातेन नटवद् घूर्ण्यते जगत् ॥८९॥
लावण्य द्रविणव्ययो नगणितः क्लेशो महान् स्वीकृतः,
स्वच्छन्दस्यमुखं जनस्य वसत श्चिन्तानलोद्दीपितः ।
एषासि स्वयमेव तुल्यरमणाभावाद्वराकी हता,
कोऽर्थश्चेतसि वेधसा विनिहतस्तन्वगा स्तनुं तन्वता ॥९०॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

नामृतं न विषं कस्मिदेकेन तु नितम्बिनी ।
सैवामृतानुरक्ता स्त्री विरक्ता विषवल्लरी ॥९१॥
गन्तव्यं यदिनाम निश्चित महो गन्तासिकेयंत्वरा,
द्वित्रीण्येव पदानि तिष्ठतु भवान् पश्यामि यावन्मुखम् ।
संसारे घटिका प्रवाह विगणद्वारा समे जीविते,
को जानाति पुनस्त्वयासह ममस्याद्वानवा सङ्गमः ॥९२॥
अस्माकं वदरो वक्ते युष्माकं वदरो गृहे ।
वादरायण सम्बन्धाद् यूयं यूयं वयं वयम् ॥९३॥
एकएव परोमानी वने वसति चातकः ।
पिपासितो वा म्रियते याचते वा पुरन्दरम् ॥९४॥
अवश्यायः कणैः प्राणान् सन्धारयति भिस्तिरः ।
याच्ञाभङ्गभयाद्भीतो नदैव मपि याचते ॥९५॥
वन्ध्याष्टमे स्त्री त्याज्यातु नवमेतु मृतप्रजा ।
एकादशे स्त्री जननो सद्यस्त्व प्रियवादिनो ॥९६॥
अनर्थित्वान्मनुष्याणां भयात् परिजनस्य च ।
मर्य्यादाया ममर्य्यादाः स्त्रिय स्तिष्ठन्तिभर्त्तृषु ॥९७॥
स्त्रीत्वं चौरत्व मेकान्तः पुंसोलाभो नियन्त्रणा ।
यत्र पञ्चाग्नयस्तत्र वातशूलं तृणस्य च ॥९८॥
अश्वश्चान्तं गजं मत्तं वृषभं काम मोहितम् ।
शूद्रमत्तर संयुक्तं दूरतः परिवर्ज्जयेत् ॥९९॥
प्रत्यक्षे गुरव स्तुल्याः परोक्षे मित्र बान्धवाः ।
भृत्याः कर्म्मणि संप्राप्ते पुत्रानैव मृताः स्त्रियः ॥१००॥
विदग्ध वनितापाङ्गदर्शनादेव यत् सुखम् ।
न तत् प्राप्नुत नारीनां गाढ़ालिङ्गन चुम्बनैः ॥१०१॥
समस्तैर्नायकगुणै र्भूषितः सखिमे पतिः ।
स एव यदि जारः स्यात् सफलं जीवितं भवेत् ॥१०२॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आकारेण शशी गिरा परभृतः पारावतश्चक्षुषा,
हंसश्चंक्रमणे गुणे सुरगुरुस्त्यां प्रमत्तोगजः।
इत्थं भर्त्तरिमे समस्त युवति श्लाघ्यैर्गुणैः सेविते;
क्षुन्नं नास्ति विवाहितः पतिरसौस्यान्नैकदोषो यदि ॥१०३॥

जातेतिचिन्तां महतीं प्रसूते,
देयात्र नोवेति विचार दुःखम्।
दत्ता सुखं तिष्ठति वा न वेति,
कन्या पितृत्वं ह्यति कष्टमेव ॥१०४॥

जवो यौवनमश्वानां फलं वृक्षस्य यौवनम्।
स्त्रिया स्तनौ यौवनं स्याद् धनं पुंसां हि यौवनम् ॥१०५॥

किं कोकिलस्य रणितेन गते वसन्ते,
किं कातरस्य बहुशास्त्रसुशिक्षितेन।
किं गर्ज्जितेन सुभटस्य पराङ्मुखस्य,
किं जीवितेन रिपुणाङ्गुलिदर्शितेन ॥१०६॥

कण्ठगद्गदता स्वेदो मुखे वैवर्ण्यवेपथू।
म्रियमाणस्य चिह्नानि यानि तान्येव याचतः ॥१०७॥

कुजस्य कोटरस्थस्य दावनिष्क्रषित त्वचः।
तरोरप्युषरस्थस्य वरं जन्म न चार्थिनः ॥१०८॥

तावत्तपस्वी तेजस्वी शूरः प्राज्ञः कुलोन्नतः।
पुमानित्युच्यते तावद् यावदर्थी न कस्यचित् ॥१०९॥

जगतां पतिरर्थित्वात् विष्णुर्वामनताङ्गतः।
कोन्योऽधिकतरस्तस्माद् योऽर्थी याति न लाघवम् ॥११०॥

लज्जावतः कुलीनस्य वित्तं याचितुमिच्छतः ॥
कण्ठे पारावतस्येव वाक्करोति गतागतम् ॥१११॥

भास्करोपि यदि ब्रूयादहोनि क्षपणं वचः।
दीपो रश्मिसहस्रेण सोऽपि शीतलतां व्रजेत् ॥११२॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

सन्तोषैश्वर्य्यसुखिनां दूरे दुर्गतिभूमयः ।
भोगाशापाशबद्धानामपमानः पदेपदे ॥११३॥
सन्तः सन्तोषमृङ्खा तृष्णाकल्लोलिनी जले ।
उन्मग्नाश्च निमग्नाश्च पश्यन्ति जनसन्ततिम् ॥११४॥
कुलं शीलञ्च सत्यञ्च प्रजातेजो धृतिर्बलम् ।
गौरवं प्रत्ययः स्नेहो दारिद्र्येण विनश्यति ॥११५॥

कुटुम्बचिन्ताकुलितस्य पुंसः,
कुलञ्च शीलञ्च गुणाश्च सर्वे ।
अपक्वकुम्भे निहिता इवापः,
प्रयान्ति तेनैव समं विनाशम् ॥११६॥

उत्तिष्ठ क्षणमेकमुद्गतसखे ! दारिद्र्यभारं गुरुम्,
श्रान्तस्तावदहं चिरान्मरणजं सेवे त्वदीयं सुखम् ।
इत्युक्तोधनवर्जितेन विदुषासुप्तः श्मशाने शवः,
दारिद्र्यान्मरणं वरं सुखमिति ज्ञात्वा स तूष्णीं स्थितः ॥११७॥
माता चैका पिता चैको मम तस्य च पत्निणः ।
अहं मुनिभिरानीतः स चानीतो गवाश्वनैः ॥११८॥

गवाश्विवाक्यानि सवक्ति नित्यम्,
अहं मुनीनां वचनानि वक्ष्मि ।
प्रत्यक्षमेतद् भवतैव दृष्टम्,
संसर्गजादोष-गुणा भवन्ति ॥११९॥

खड्गस्य गुणहीनस्य तैक्ष्ण्यं सुपुरुषं वपुः ।
युक्तं न तु गुणाढ्यस्य धनुषः प्राणिहिंसनम् ॥१२०॥
गुणवानेव नमते पुरुषः कार्म्मुकं यथा ।
स एव स्तब्धतामेति निर्गुणः कार्म्मुकं यथा ॥१२१॥
स एव गुणवान् धन्योऽधन्यः कालपर्य्यये ।
स एव पुरुषो दाता पुनर्भवति याचकः ॥१२२॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यस्योपाय सहस्रेण बधमिच्छामि राघव ! ।
तस्यैव श्रेय इच्छामि कार्य्याणां चञ्चलागतिः ॥१२३॥
गुणाः सर्व्वत्र पूज्यन्ते पितृवंशो निरर्थकः ।
वासुदेवं नमस्यन्ति वसुदेवं न केचन ॥१२४॥
भ्रष्टं जन्मभूवस्ततोऽम्बुधिपयः पूरेण दूरीकृतम्,
लग्नं तीरवने वनेचरशतै रात्तं ततः खण्डितम् ।
विक्रीतं तुलितं ततः खरशिलाघृष्टं जनैश्चन्दनम्,
वन्दन्ते करटे विपक्षपिगुणैः को नामनो पूज्यते ॥१२५॥
गुणाः खलु गुणा एव न गुणा धन हेतवः ।
अर्थसञ्चयकर्त्तृणि भाग्यानि पृथगेव हि ॥१२६॥
गुणा खलु गुणा एव नगुणा धनहेतवः ।
सगुणो निष्फलं चापः निर्गुणः सफलः शरः ॥१२७॥
गुणा गुणज्ञेषु गुणा भवन्ति,
ते निर्गुणं प्राप्य भवन्ति दोषाः ।
सुस्वादुतोय-प्रभवाहि नद्यः,
समुद्रमासाद्य भवन्त्य पेयाः ॥१२८॥
गुणैर्नकिञ्चिद् विदुषां प्रयोजनम्,
खलोऽर्थभागी सुगुणश्च निर्धनः ।
यथा हि काको लभते गृहाबलिम्,
तथा न हंसो न शुको न चातकः ॥१२९॥
सन्तोऽपि न प्रकाशन्ते दरिद्रस्याखिला गुणाः ।
भास्वानिव पदार्थानां श्रीर्गुणानां प्रकाशिनी ॥१३०॥
मणिः शाणेऽनोचैः समरविजयीहीति निहितः,
मदक्षीणो नागः शरदि सरिदासानुपुलिना ।
कलाशेषश्चन्द्रः सुरतमृदुता बाललनना,
न निम्नाः शोभन्ते व्ययित-विभवाश्चार्थिषु नराः ॥१३१॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

चन्द्रो भाति सुनिर्म्मलेऽथ गगने ताराविचित्रेऽम्बरे,
हारो भाति च कामिनी कुचतटे पीनोन्नते यौवने ।
हंसो भाति सरोवरे स नलिने वैदूर्य्य वर्णोदके,
राजा भाति सुमन्त्रिभिः परिवृतः श्रीधाम्निसिंहासने ॥१३२॥

स्वच्छं सज्जनचित्तवल्लघुतरं दीनार्त्तिवच्छीतलम्,
पुत्रालिङ्गनवत्तथैवमधुरं तद्वालसम्भाषणत् ।
जीवस्यापि हि जीवितं द्रविणवद्दुःखापहं लुप्तवत्, *
सद्यः पापहरं हरिस्मरणवत् पानीयमानीयताम् ॥१३३॥

व्यायामिकोऽस्मि चतुरोऽस्मि विचक्षणोऽस्मि,
विद्याधरोऽस्मि पटुरस्मि नचास्मि भीरुः ।
कार्य्यं करोमि सततं न च सिद्धिरस्ति,
दैवं न सम्वहति कोऽत्र ममापराधः ॥१३४॥

जानामि धर्म्मं न च मे प्रवृत्तिः,
जानाम्यधर्म्मं न च मे निवृत्तिः ।
केनापि देवेन हृदिस्थितेन,
यथा नियुक्तोऽस्मि तथा करोमि ॥१३५॥

साधयति यत् प्रयोजनमन्नः,
अपि तदस्य काकतालीयम् ।
अविदन्नपि किमक्षरम्,
उल्लिखति घूर्णोऽपि काष्ठेषु ॥१३६॥

कः कण्टकानां प्रकरोति तैक्ष्ण्यम्,
विचित्रभावं मृगपक्षिणाञ्च ।
माधुर्य्यमिक्षौ कटुता च निम्बे,
स्वभावतः सर्वमिदं हि सिद्धम् ॥१३७॥

* लोष्ट्रवत् इत्यपिपाठः शोभते ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अर्थस्य मूलं विक्रतिर्नयश्च,
धर्मस्य कारुण्यमकैतवञ्च ।
कामस्य वित्तञ्च वपुर्वयश्च,
मोक्षस्य सर्वार्थनिवृत्तिरेव ॥१३८॥

विद्वानेव हि जानाति विद्वज्जनपरिश्रमम् ।
नहि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् ॥१३९॥

कविरेव कवेर्वेत्ति कविकर्मणि कौशलम ।
शेषाहि रेव जानाति भुवो भारस्य निश्चयम् ॥१४०॥

देशे हि यत्र करभ कलभश्चतुल्यौ,
यत्रापि नास्ति हयराजभयोर्विचारः ।
काचोपलस्य च मणेश्च न यत्र भेदः,
को नाम तत्र गुणिनामधिवासरागः ॥१४१॥

गुणा यत्र न पूज्यन्ते गुणिनान्तत्र का कथा ? ।
नग्न क्षपणकग्रामे रजकः किं करिष्यति ॥१४२॥

मेरुश्चलतिकल्पान्ते मर्य्यादां सागरस्त्यजेत् ।
प्रतिपन्नसहाः सत्त्वा न चलन्ति कदाचन ॥१४३॥

हंसो न भातिबलिभोजन वृन्दमध्ये,
गोमायुमण्डलगतो न विभाति सिंहः ।
जात्या न भाति तुरगः खरयुथमध्ये,
विद्वान्न भाति पुरुषेषु निरक्षरेषु ॥१४४॥

विन्ध्यः पुरारविरथावधिवह्नि-मूर्द्धा,
निम्नत्वमाप्य वचनात् किलकुम्भयोनेः ।
नाद्यापि लङ्घयति सत्यमतिः प्रतिज्ञा
मङ्गीकृतं सुकृतिनः परिपालयन्ति ॥१४५॥

अद्यापि नोज्झति हरः किल कालकूटम्,
शेषो विभर्त्ति धरणीं खलु मस्तकेषु ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अम्भोनिधिर्वहति दुर्वहवाड़वाग्निम्,
अङ्गीकृतं सुकृतिनः परिपालयन्ति ॥१४६॥
उत्पलस्य च पद्मस्य मत्स्यस्य कुसुमस्य च ।
एकजातिप्रसूतानां रूपं गन्धः पृथक् पृथक् ॥१४७॥
मृगा मृगैः सख्यमनुव्रजन्ति,
गोभिश्च गावस्तुरगास्तुरङ्गैः ।
मूर्खैश्च मूर्खाः कवयः कवीन्द्रैः,
समानशीलाश्च समानशीलैः ॥१४८॥
अम्भोधिस्थलतां स्थलं जलधितां धूलिलवः शैलताम्,
मेरुर्मृत्कणतां तृणं कुलिशतां वज्रं तृणप्रायताम् ।
वह्निः शीतलतां हिमं दहनतामायाति यस्येच्छया,
हेलादुर्ललिताङ्गूतव्यसनिने देवाय तस्मै नमः ॥१४९॥
भग्नाग्रस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा,
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा,
सुस्थस्तिष्ठति दैवमेव हि नृणां वृद्धौ क्षये चोद्यताम् ॥१५०॥
खल्वाटो दिवसेश्वरस्य किरणैः सन्तापिते मस्तके,
बाञ्छन् देशमनातपं द्रुततरं विल्वस्य मूलङ्गतः ।
तत्राप्यस्य महाफलेन पतता भग्नं समस्तं शिरः,
प्रायो गच्छति यत्र भाग्यरहितस्तत्रापदां भाजनम् ॥१५१॥
सिंहिकासुतसन्नद्धः शशः शीतांशुमाश्रितः ।
जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः ॥१५२॥
पिता विवेकः सुमतिर्जनित्री,
स्वसाप्यहिंसा दयिता दयैव ।
धर्मः सहायः करुणा कुमारी,
सुनूनृता दीन-जनोपकारः ॥१५३॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धैर्यं यस्य पिता क्षमा च जननी शान्तिः सदा गेहिनी,
सत्यं सूनुरयं दया च भगिनी भ्राता मनः संयमः।
शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजनम्,
यस्यैते हिकुटुम्बिनो वद सखे! कस्माद्भयं योगिनः ॥१५४॥

स्थानं प्रधानं न बलं प्रधानम्,
स्थानस्थितः कापुरुषोऽपि सिंहः।
जानामि रे पन्नग! ते प्रभावम्,
कण्ठस्थितो गर्जसि मद्गुरस्य ॥१५५॥

शिरसा धार्यमाणोऽपि सोमः सौम्येन शम्भुना।
तथापि क्षयतां धत्ते कष्टं खलु पराश्रयः ॥१५६॥

आपद्गतं हससि किं द्रविणान्धमूढ!
लक्ष्मीः स्थिरा न भवतीति किमत्र चित्रम्।
एतान्न पश्यसि घटान् जलयन्त्रमध्ये,
रिक्ते भवन्ति पूरिता भरितास्च रिक्ताः ॥१५७॥

अधनोऽयं धनं प्राप्य माद्यन्नद्यैनं मां स्मरेत्।
इति कारुणिको नूनं धनं मे भूरिनाददत् ॥१५८॥

किं पाद्यं भवते भवेत् सुरसरित्पादोदकाय प्रभो,
को दीपस्तरणेर्जगण्य गरुडारूढाय किं वाहनम्।
किंभोज्यं जगदन्नदाय वसनं किं दिव्यवासोभृते,
किं स्तोत्रं निगमागमाय तदलं भक्तिर्भवत्तुष्टये ॥१५९॥

व्याधस्याचरणं ध्रुवस्य च वयो विद्यागजेन्द्रस्य का,
का जातिर्विदुरस्य यादवपते! उग्रस्य किं पौरुषम्।
कुब्जायाः किसुनामरूपमधिकं किन्तत् सुदाम्नो धनम्,
भक्त्या तुष्यति केवलं हरिरतो भक्तिप्रियो माधवः ॥१६०॥

स्वर्गापवर्गयोः पुंसां रमाया भुवि सम्पदाम्।
सर्व्वासां कार्य्यसिद्धीनां मूलं तच्चरणार्च्चनम् ॥१६१॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

igitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

क्वाहं दरिद्रः पापीयान् क्व कृष्णः श्रीनिकेतनः ।
ब्रह्मबन्धुरिति स्माहम् बाहुभ्यां परिरभ्यते ॥१६२॥
प्रपद्य विपुलां लक्ष्मीं यः करोति न सञ्चयम् ।
धनानां चैव वस्त्राणां मूषकः स इति स्मृतः ॥१६३॥
शीतभीतश्च विप्रश्च रणभीतश्च क्षत्रियः ।
धनाढ्यो दानभीतश्च त्रयी स्वर्गं न गच्छति ॥१६४॥
चाणक्य-माणिक्यमिदं कण्ठे बिभ्रति ये बुधाः ।
प्रहितं भोजराजेन भुवि किं प्राप्यते न तैः ॥१६५॥

इति चाणक्यराजनीतिशास्त्रे ऽष्टमोऽध्यायः
समाप्तः ॥

समाप्तश्चायं ग्रन्थः ॥

प्रकाशक—श्रीसारदाचरण काव्यविनोद ।
१६नं नवीन कुण्डु लेन,
दर्शनविद्यालय, कलिकाता ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

gitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgac

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry